दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-11 ■ वर्ष-5 ■ अङ्क-319 | 1 | सितम्बर 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णद्वादशी
भाद्रपद 23 प्रविष्टांशः मङ्गलमयः भवेत्

2 राष्ट्रियराजधान्याः सत्यनिकेतन-क्षेत्रे भवन-पतनेन मृतानां सङ्ख्या संवर्ध्य सप्त यावत् उपगता वर्तते

4 उद्घाटन-शिलान्यासयोः सांसदानां विधायकानां च आमन्त्रणम् अनिवार्यम्; पीएमजीएसवाई-कार्याणि सन्दर्भ्य केन्द्रस्य राज्येभ्यः कठोर-निर्देशाः

9 संस्कृताश्रिता, संस्कृतमयी 'कः भवति बृहस्पतिः?' इति प्रतियोगिता आयोजिता

## केन्द्रीयगृहमन्त्री अमितशाहः गोवायाः पणजी-नगरे पश्चिमक्षेत्रीय-परिषदः अष्टाविंशतितमस्य उपवेशनस्य अध्यक्षतां कृतवान्



केन्द्रीयगृहमन्त्री अमितशाहः गोवायाः पणजी-नगरे पश्चिमक्षेत्रीयपरिषदः अष्टाविंशतितमस्य उपवेशनस्य अध्यक्षतां कृतवान्। परिषदि गोवा-गुजरात-महाराष्ट्रैः सह केन्द्रशासितप्रदेशौ दादरा-नगरहवेली-दमन-दीव इत्येतौ च सम्मिलितौ स्तः। उपवेशने गोवायाः मुख्यमन्त्री प्रमोदसावन्तः, गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः, महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्रफडणवीसः च भागं गृहीतवन्तः। दादरा-नगर-हवेली-दमन-दीव इत्येतयोः प्रतिनिधयः अपि उपवेशने भागं गृहीतवन्तः। उपवेशनस्य कार्यसूचौ केन्द्र-राज्ययोः मध्ये सामान्यहितसम्बद्धानि प्रकरणानि अथ संयुक्तरूपेण कार्याचरणं च सदृशाः विषयाः समाविष्टाः आसन्। गोवारक्षि-बलाय प्रतिष्ठितं प्रेसिडेंट्स् पुलिस कलर इति विशिष्ट-ध्वज-सम्माननं प्रदत्तवान् अमितशाः केन्द्रीयगृहमन्त्री अमितशाहः तलेगाँव्-स्थिते डॉ. श्यामाप्रसादमुखर्जी-इण्डोर-स्टेडियम् इत्यस्मिन् क्रीडाङ्गणे आयोजिते समारोहे गोवारक्षि-बलाय प्रतिष्ठितं प्रेसिडेंट्स् पुलिस कलर इति विशिष्ट-ध्वज-सम्माननं प्रदत्तवान्। प्रेसिडेंट्स् पुलिस कलर इति ध्वजः 'राष्ट्रपति का निशान' इति नाम्ना अपि प्रख्यातः, सः कस्मैचित् आरक्षि-बलाय प्रदीयमानेषु सर्वोच्चसम्मानेषु अन्यतमः अस्ति। अनेन सम्मानेन गोवारक्षि-बलस्य राज्यस्य जनान् प्रति समर्पितसेवा, अनुशासनं प्रतिबद्धता च सम्मानिता भवति। केन्द्रीयगृहमन्त्री अमितशाहः सम्प्रति प्रचलिते अस्मिन् समारोहे भागं गृह्णाति ।

## अद्यतनीयं सुभाषितम्

**बलवानप्यशक्तोऽसौ धनवानपि निर्धनः।**
**श्रुतवानपि मूर्खोऽसौ यो धर्मविमुखो जनः।।**

भावार्थः- जो व्यक्ति कर्मठ नहीं हैं अपना धर्म नहीं निभाता वो शक्तिशाली होते हुए भी निर्बल है, धनी होते हुए भी निर्धन है और पढ़े लिखे होते हुए भी अज्ञानी है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरात-महाराष्ट्रयोः यात्रायै प्रस्थास्यति

प्रधानमन्त्री नरेन्द्रमोदी गुजरात-महाराष्ट्रयोः यात्रायै प्रस्थास्यति। वडोदरायां प्रधानमन्त्री पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकास-परियोजनानां शिलान्यासं उद्घाटनं च कृत्वा एतानि राष्ट्राय समर्पयिष्यति। महाराष्ट्रस्य मुम्बईनगरे प्रधानमन्त्री ऐषमः ग्लोबल्-फिनटेक्-फेस्ट् इत्यस्य उद्घाटनं करिष्यति।





## जयशङ्करस्य लक्ज़मबर्गस्य उपप्रधानमन्त्रिणा सह मेलनम्

विदेशमन्त्री डॉ. एस्. जयशङ्करः उक्तवान् यत् यदा सम्पूर्ण विश्वम् अनिश्चिततां प्रति चिन्तितम् अस्ति, तादृशे काले भारत-लक्ज़मबर्ग-देशयोः मध्ये विश्वसनीयाः सम्बन्धाः सन्ति। डॉ. जयशङ्करः नवदेहल्यां लक्ज़मबर्गदेशस्य उपप्रधानमन्त्रिणा, विदेशव्यापारमन्त्रिणा च जेवियर् बेटेल् इत्यनेन सह उपवेशनावधौ वक्तव्यमिदं प्रदत्तवान्। डॉ. जयशङ्करः वर्षस्य प्रारम्भे कृतां स्वकीयां लक्ज़मबर्ग-यात्राम् अपि स्मृतवान्। विदेशमन्त्री उक्तवान् यत् वाणिज्यं, निवेशः, वित्तीयसहकारश्च उभयोः देशयोः सम्बन्धानां केन्द्रे स्थिताः सन्ति। जेवियर् बेटेल् स्वीयसम्बोधने उक्तवान् यत् लक्ज़मबर्गदेशस्य भारतस्य च मध्ये विश्वसनीयाः सुदृढाश्च सम्बन्धाः सन्ति। श्री बेटेल् गतदिवसे एवं भारतस्य त्रिदिवसीययात्रायै नवदिल्ल्यां सम्प्राप्तवान्।

## उपराष्ट्रपतिः असमस्य गुवाहाटी-विश्वविद्यालये सम्बोधयन्

### युवकेभ्यः मादकद्रव्याणां विरुद्धे सङ्घर्षे प्रतिबद्धतया स्थातुम् आग्रहं कृतवान्

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् युवानः मादकद्रव्याणां दुरुपयोगस्य विरुद्धं सुदृढं पक्षं स्वीकर्तुं, मादकद्रव्यविहीन-समाजस्य निर्माणे च सक्रियतया योगदानं दातुम् आहूतवान्। असमस्य गुवाहाटी-विश्वविद्यालये आयोजिते कार्यक्रमे विद्यार्थिनः सम्बोधयन् उपराष्ट्रपतिः युवकेभ्यः मादकद्रव्याणां विरुद्धे सङ्घर्षे प्रतिबद्धतया स्थातुम् आग्रहं कृतवान्। सः उपस्थितान् जनान् मादकद्रव्य-विहीनसमाजस्य निर्माणाय कार्यं कर्तुं संकल्पं कारितवान्।

## टेनिस-स्पर्धायां, पूर्वतन-विजेतारौ अरीना सबालेंका अथ कार्लोस अल्करासः यू.एस. ओपन् प्रतियोगितायाः प्रागुपान्त्यचक्रे स्वस्थानं रक्षितवन्तौ



टेनिस-स्पर्धायां पूर्वतन-विजेतारौ अरीना सबालेंका अथ कार्लोस अल्करासः यू.एस. ओपन् प्रतियोगितायाः प्रागुपान्त्यचक्रे स्वस्थानं रक्षितवन्तौ

# राष्ट्रियराजधान्याः सत्यनिकेतन-क्षेत्रे भवन-पतनेन मृतानां सङ्ख्या संवर्ध्य सप्त यावत् उपगता वर्तते



### दिल्ली-नगर-निगमस्य दक्षिण-क्षेत्रस्य उपायुक्तं समेत्य चत्वारः अभियन्तारः तात्कालिक-प्रभावेण निलम्बिताः

राष्ट्रियराजधान्याः सत्यनिकेतन-क्षेत्रे भवन-पतनेन मृतानां सङ्ख्या संवर्ध्य सप्त यावत् उपगता वर्तते। अखिल-भारतीय-आयुर्विज्ञान संस्थानेन विज्ञापितं यत् दुर्घटना-स्थलात् द्वादशजनाः चिकित्सालयं नीताः। तेषु षण्णां पूर्वमेव मृत्युः अभवत्, एकश्च उपचारावसरे प्राणम् अत्यजत् । एम्स-प्रशासनेन प्रत्यपादि यत् एतेषु त्रयः अतीव सङ्कटापन्नायां स्थितौ वर्तन्ते, द्वयोः अवस्था स्थिरा वर्तते। अत्रान्तरे, अस्याः दुर्घटनायाः अनन्तरं दिल्ली-सर्वकारेण दृढं प्रशासनिक-पदक्षेपं उत्थापयता दिल्ली-नगर-निगमस्य दक्षिण-क्षेत्रस्य उपायुक्तः राकेश कुमारः, अधीक्षण अभियन्ता रणवीर-सिंहः, कार्य-पालक-अभियन्ता ललित-कुमारः, सहायक-अभियन्ता सुनील चौहानः, अथ च एकः कनिष्ठ-अभियन्ता इति पञ्च अधिकारिणः तात्कालिक-प्रभावेण निलम्बिताः ।

# नागरिक-ग्रामीणक्षेत्रेभ्यः एल.पी.जी-पुनःपूरण-पञ्जीकरणस्य अन्तरालं सम्प्रति पञ्चविंशतिदिनानि



केन्द्रीय-तैल-प्राकृतिकवातक-राज्यमन्त्री सुरेशगोपी अद्य न्यवेदयत् यत् सर्वकारेण तैलविपणनकम्पनीभ्यः गार्हस्थ्य-रन्धनवातक-एलपीजी-पुनःपूरणपञ्जीकरणस्य नियमेषु महती शिथिलता दातुं निर्देशः प्रदत्तः। अधुना देशस्य सर्वे गार्हस्थ्य-एलपीजी-उपभोक्तारः, चाहे ते नागरक्षेत्रस्य स्युः अथवा ग्रामीणक्षेत्रस्य, पञ्चविंशतिदिनानाम् अन्तराले स्वस्य अग्रिमं वातकभाण्डं (सिलिण्डर्) पञ्जीकर्तुं शक्ष्यन्ति। श्रीगोपी सामाजिकमाध्यमस्य एकां प्रविष्टिं (सोशल मीडिया पोस्ट्) माध्यमेन अकथयत् यत् देशे एलपीजी-आपूर्तेः स्थितौ सुधारं तथा च अवशिष्टेषु (बैकलॉग्-विषयेषु) आगतां महतीं न्यूनतां दृष्ट्वा केन्द्रसर्वकारेण एषः प्रतिबन्धः निवारितः। केन्द्रीयमन्त्री स्वप्रविष्ट्या सह पेट्रोलियम-मन्त्रालयेन तैलकम्पनीभ्यः तत्कालप्रभावेण नियमं प्रवर्तयितुं निर्गमितस्य पत्रस्य प्रतिलिपिम् अपि समभाजयत्। उल्लेखनीयम् अस्ति यत् पश्चिम-एशिया-सङ्कटकारणात् एलपीजी-आपूर्तौ वर्धमानं दबावं दृष्ट्वा, पूर्वं पुनःपूरणपञ्जीकरणस्य अन्तरालं नागरक्षेत्रेभ्यः पञ्चविंशतिदिनानि ग्रामीणक्षेत्रेभ्यः च पञ्चचत्वारिंशद् दिनानि निर्धारितम् आसीत्, यत् अधुना समानीकृतम् अस्ति।

# जीवनस्य गुणवत्तायाः रक्षणे विशुद्ध-वायोः महती भूमिका अस्ति- (एन.जी.टी.) अध्यक्षः न्यायमूर्तिः प्रकाश-श्रीवास्तवः




राष्ट्रिय-हरित-अधिकरणस्य (एन.जी.टी.) अध्यक्षः न्यायमूर्तिः प्रकाश-श्रीवास्तवः नवदेहल्यां 'इण्टरनेशनल् डे आफ् क्लीन् एयर् फॉर् ब्लू स्काईज्' इत्यस्य अवसरे आयोजिते 'स्वच्छ-वायु-दिवस' कार्यक्रमे सम्बोधनम् अकरोत्। स्वसम्बोधने सः बलं दत्त्वा अवदत् यत् जीवनस्य गुणवत्तायाः रक्षणे विशुद्ध-वायोः महती भूमिका अस्ति। अस्माकं लक्ष्यम् एतत् भवेत् यत् बालाः भयं विना बहिः क्रीडितुं शक्नुयुः, वृद्धाः च कमपि स्वास्थ्य-चिन्तां विना प्रातःभ्रमणे गन्तुं शक्नुयुः।न्यायमूर्तिः श्रीवास्तवः अकथयत् यत् वायु-प्रदूषणं कामपि सीमां न मन्यते। अस्य पृष्ठे वाहनानि, उद्योगाः, निर्माणकार्येभ्यः निर्गच्छन् अवकरः च इति बहवः स्रोतांसि उत्तरदायीनि सन्ति।सः अस्याः समस्यायाः निवारणाय सर्वान् हितधारकान् मिलित्वा प्रयासं कर्तुम् आह्वानम् अकरोत्। अनेन सहैव सः राष्ट्रिय-स्वच्छ-वायु-कार्यक्रमस्य अन्तर्गतं केन्द्र-राज्य-सर्वकाराणां प्रयासानां प्रशंसां च अकरोत्।अस्मिन् अवसरे राष्ट्रिय-स्वच्छ-वायु-कार्यक्रमान्तर्गतं वायु-गुणवत्तायाः संवर्धनाय उत्कृष्ट-प्रयासं कृतवन्तः नगराः 'पञ्चम-स्वच्छ-वायु-सर्वेक्षण-पुरस्कारेण' सम्मानिताः अभवन्। एनजीटी-अध्यक्षः अवदत् यत् पुरस्कार-विजेतृभिः एतत् प्रमाणितं यत् विशुद्धा वायुः कापि कल्पना नास्ति, अपितु एकं व्यावहारिकं लक्ष्यम् अस्ति, यत् समुचित-योजनया भूमौ (धरातले) कार्यं कृत्वा च प्राप्तुं शक्यते।

# नेपालदेशे जलाप्लावेन मृतकानां सङ्ख्या पञ्चपञ्चाशदधिक-त्रयोदशशतं यावत् वर्धिता



नेपाल-तिब्बत इत्येतयोः सहसा आगतेन विनाशकारिणा जलाप्लावेन मृतकानां सङ्ख्या पञ्चपञ्चाशदधिक-त्रयोदशशतं यावत् वर्धिता। राष्ट्रियापद्-सङ्कट-न्यूनीकरण-प्रबन्धन-प्राधिकरणस्य अनुसारं सर्वाधिकाः जनाः चितवन्-नगरे मृताः, अनन्तरं नवलपरासी पूर्व इत्यस्य स्थानम् अस्ति।

# बिहार-मध्यप्रदेश-पूर्वउत्तरप्रदेश-उत्तराखण्ड-पश्चिमबङ्गाल-पूर्वोत्तरभारत इत्येतेषां केषुचित् भागेषु च अतिवृष्टेः सम्भावना – ऋतुविभागः



भारतर्तुविज्ञान-विभागेन संसूचितं यत् बिहार-मध्यप्रदेश-पूर्वउत्तरप्रदेश-उत्तराखण्ड-पश्चिमबङ्गाल-पूर्वोत्तरभारत इत्येतेषां केषुचित् भागेषु च अतिवृष्टेः सम्भावना अस्ति। ऋतुविभागेन उक्तं यत् श्वः यावत् आन्ध्रप्रदेश-झारखण्ड-ओडिशा-छत्तीसगढ-तमिलनाडु-राज्येषु मेघगर्जनेन सह वृष्टेः सम्भावना वर्तते।



# विश्व-दिव्याङ्ग-धनुर्विद्या-शृङ्खलायां, शीतल-देवी अन्तिम चक्रे प्रवेशं लब्ध्वा भारतस्य कृते पदकं सुनिश्चितवती

अहमदाबादे समायोज्यमानायाः विश्व-दिव्याङ्ग-धनुर्विद्या-शृङ्खलायाः तृतीय-चरणस्य तृतीये दिवसे वर्तमान-विश्व-विजेत्री शीतल-देवी अन्तिम चक्रे प्रवेशं लब्ध्वा भारतस्य कृते पदकं सुनिश्चितवती । उभयोः भारतीययोः मध्ये सञ्जाते उपांत्य-द्वन्द्वे जम्मू-प्रदेशस्य शीतल-देव्या स्वदेशीया सरिता पञ्चचत्त्वारिंशदुत्तर-शततः त्रिचत्वारिंशदुत्तर-शताङ्कैः पराजित्य सुवर्ण-पदकस्य निर्णायक-स्पर्धायां स्वस्थानं सुनिश्चितम्। अन्तिम चरणे सा कज़ाकिस्तान-देशस्य आइज़ादा-सैदन् इत्यनया सह प्रतिस्पर्धिष्यति।

# सीबीएसई-सम्बद्ध-सर्वकारीय-विद्यालयेषु समाजशास्त्रस्य १०७ शिक्षकाणां नियुक्तिः

हिमाचल प्रदेश स्कूली शिक्षा निदेशालय

**हिमसंस्कृतवार्ता — शिमला।**
हिमाचलप्रदेशस्य केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन (CBSE) सम्बद्धेषु सर्वकारीय-वरिष्ठ-माध्यमिक-विद्यालयेषु समाजशास्त्र-विषयस्य १०७ शिक्षकाणां पदस्थापना कृता अस्ति। शिक्षा-निदेशालयेन सोमवासरे 'राज्य-चयन-आयोगः हमीरपुरम्' इत्यस्य संस्तुत्यां चयनितानाम् अभ्यर्थिनां नियुक्ति-पदस्थापना-आदेशाः प्रसारिताः।

नियुक्तेभ्यः शिक्षकेभ्यः वैयक्तिक-पाठनं (Private Tuition), उपशिक्षणं (Coaching) अथवा कस्मिंश्चित् अन्यस्मिन् लाभप्रदे पदे कार्यं कर्तुं पूर्ण-प्रतिबन्धः भविष्यति। शिक्षकाणां पदस्थापना राज्य-सर्वकारस्य उप-योजनायाः अन्तर्गतं पञ्चवर्षीय-कालावधये अस्थायी-रूपेण कृता अस्ति। चयनिताः शिक्षकाः प्रति-शैक्षणिक-वर्षं दश-मासानां कृते त्रिंशत्-सहस्र-रूप्यकाणि (३०,०००) प्रति-मासं निश्चित-मानदेयं लप्स्यन्ते।

नियुक्ति-आदेशानुसारम् अभ्यर्थिभ्यः सम्बद्ध-विद्यालयेषु कार्यभार-ग्रहणाय पञ्चानां कार्य-दिवसानां समयः प्रदत्तः। निर्धारितावधौ कार्यभारम् अग्रहणे सति नियुक्तिः स्वतः निरस्ता भविष्यति। नियुक्ताः शिक्षकाः षष्ठी-कक्षातः द्वादश-कक्षां यावत् समाजशास्त्रं तथा च सामाजिक-विज्ञान-विषयान् पाठयिष्यन्ति। विद्यालयस्य आवश्यकतानुसारं तैः अतिरिक्ताः उपचारात्मकाः (Remedial) कक्षाः अपि नेतव्याः भविष्यन्ति।

कार्यभार-ग्रहणात् पूर्वम् अभ्यर्थिभिः सम्बद्ध-प्रधानाचार्यस्य समक्षं न्यायिक-मुद्राङ्क-पत्रे (Judicial Stamp Paper) अनुबन्ध-बन्धपत्रं (Contract Bond) स्वघोषणा-पत्रं च निष्पादनीयं भविष्यति। आदेशे स्पष्टीकृतं यत् एताः नियुक्तयः कस्यापि स्वीकृतस्य नियमित-पदस्य विरुद्धं न कृताः सन्ति। एतादृश्यां स्थितौ नियुक्ताः अभ्यर्थिनः भविष्ये नियमितीकरणस्य, सर्वकारीय-सेवायां समावेशनस्य, अथवा सर्वकारीय-कर्मचारिणः पदवी-प्राप्तेः अधिकार-पक्षं कर्तुं न शक्ष्यन्ति।

इयं नियुक्तिः पूर्णतया अनुबन्धस्य नियमाधीना स्थास्यति। अनुबन्धित-शिक्षकाः एकस्मिन् वर्षे दश (१०) आकस्मिक-अवकाशान् (Casual Leaves) लप्स्यन्ते। नियमानुसारं योग्यतायां सत्यां मातृत्व-अवकाशः अपि देयः भविष्यति। एतेभ्यः सामान्य-सर्वकारीय-कर्मचारिणां चिकित्सा-नियमानां स्थाने 'हिमकेयर' उत 'आयुष्मान् भारत' योजनायाः अन्तर्गतं स्वास्थ्य-सुविधाः प्राप्स्यन्ते। विद्यालयानां प्रधानाचार्याः अभ्यर्थिनां कार्यभार-ग्रहणात् पूर्वं तेषां शैक्षणिक-प्रमाणपत्राणां चरित्र-सत्यापन-सहितानाम् आवश्यक-प्रपत्राणां सूक्ष्म-परीक्षणं विधातुं निर्दिष्टाः।

# प्रतिबन्धे सत्यपि स्नानार्थं डायनासौर-सरोवरं प्राप्ताः श्रद्धालवः, एकस्य युवकस्य मृत्युः



**हिमसंस्कृतवार्ताः- कुल्लूः।** हिमाचलप्रदेशस्य कुल्लू-मण्डलस्य लग- उपत्याकायां स्थिते डायनासौर-सरोवरे प्रतिबन्धे सति अपि श्रद्धालवः बीस-भादो-स्नानार्थं प्राप्तवन्तः। अस्मिन्नेव काले सहसा स्वास्थ्यावस्थायाः प्रतिकूलत्वात् एकस्य युवकस्य मृत्युः अभवत्। मृतकस्य परिचयः तापे रामः (२३), त्रिसड़ी-निवासी, कुल्लूमण्डलम् इति रूपेण अभवत्। प्राप्तविवरणानुसारं सः स्नानार्थं स्वमित्रैः सह हिमरी टॉप, सुलधारमार्गेण २० भादो, अर्थात् शनिवासरे, डायनासौरं प्राप्तवान् आसीत्। सरोवरस्य समीपं प्राप्तमात्रे एव युवकस्य सहसा स्वास्थ्यं प्रतिकूलम् जातम्, किञ्चित्कालानन्तरं च तस्य मृत्युः अभवत्। तस्य मित्रैः पुलिसप्रशासनाय कथितं यत् तस्य श्वासग्रहणे काठिन्यम् अनुभूयते स्म।

मित्रैः घटनायाः सूचना परिजनानां पुलिस प्रशासनस्य च दत्ता। ततः रविवासरे परिजनाः, ग्रामजनाः, पुलिसकर्मचारिणः, उद्धारदलस्य सदस्याः डायनासौरं प्राप्तवन्तः। ततः तापे रामस्य शवः रविवासरस्य रात्रौ विलम्बेन क्षेत्रीय-चिकित्सालयं कुल्लू आनीतः। सोमवासरे पुलिसप्रशासने शवस्य शवपरीक्षणं कारयित्वा शवः परिजनेभ्यः समर्पितः। अपरतः फुंगणी-मातुः पुजारी रामलालठाकुरः अवदत् यत् डायनासौरे बीस-भादो-स्नाने प्रतिबन्धः स्थापितः अस्ति। पञ्च- षड् युवकाः हिमरी-टॉप-मार्गेण डायनासौरं प्राप्तवन्तः, तेषु एकस्य स्वास्थ्यावस्था विषमा तथा च तस्य मृत्युः अभवत्।

पुलिस- अनुसारं युवकस्य मृत्योः प्रथमदृष्ट्या कारणम् ऑक्सीजनस्य न्यूनता इति प्रतीयते। तथापि शवपरीक्षणस्य प्रतिवेदनं प्राप्तं ततः एव युवकस्य मृत्योः वास्तविककारणस्य ज्ञानं भविष्यति। एस. पी. अभिषेक एस. अवदत् यत् पुलिस प्रशासनं प्रकरणस्य अन्वेषणं करोति।

# निकृष्ट-औषध-सामग्री-विक्रये तथा जी. एस. टी. करचौर्ये राज्यसर्वकाराय, औषधि- उद्योग-सञ्चालकेभ्यः उच्चन्यायालयस्य सूचनापत्रम्

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेश-उच्चन्यायालयेन निकृष्ट-औषधानां निर्माणस्य, कूटप्रपञ्चस्य, कोटिरूप्यकाणां जी. एस. टी. करचौर्यस्य सम्बन्धिते जनहितप्रकरणे राज्यसर्वकाराय, एकस्य औषधि- निर्माण-कम्पन्याः सञ्चालकेभ्यः सूचनापत्रं निर्गतम्, उत्तरं च याचितम्। मुख्यन्यायाधीशः गुरमीतसिंह संधावालिया, न्यायाधीशः चिरागभानुः इत्येताभ्यां युक्तया खण्डपीठेन अनमोलसिंहराणा इत्यस्य पक्षतः प्रस्तुतायां जनहितयाचिकायां एषः आदेशः प्रदत्तः। अस्य प्रकरणस्य अग्रिमा श्रवणतिथिः ७ अक्तूबर निर्धारिता अस्ति। जनहितयाचिकायां कथितम् अस्ति यत् अस्मिन् सम्पूर्णे प्रकरणे २७ तः २८ टनपर्यन्तं औषधिनिर्माणसामग्रीणाम् (अनिर्मितवस्तोः) अवैधापूर्तिः, प्रपञ्चेन बृहद्रूपेण च जी.एस.टी. करचौर्यम् इत्यादयः विषयाः प्रकाशं गताः सन्ति। अस्मिन् अवैधरूपेण अर्जितस्य कृष्णधनस्य परीक्षणम् अत्यन्तम् आवश्यकम् अस्ति।

## कम्पनी-सञ्चालकेषु निकृष्ट-औषधनिर्माणस्य आरोपः

कम्पन्याः निदेशकानाम् उपरि आरोपः अस्ति यत् तैः २७५ किलोग्राममितं निकृष्ट-औषधस्य 'एक्सप्लोटैब' इत्यस्य विक्रय-अभिलेखः गोपितः, वैध- अनुज्ञप्तिं विना विपुलमात्रायां कूटौषधानि निर्मितानि। एतत् ड्रग्स् एण्ड कॉस्मेटिक्स एक्ट, १९४० इत्यस्य प्रत्यक्षम् उल्लङ्घनम् अस्ति।

औषधि-विभागेन जुलाई २०२३ मध्ये एव तेषां थोक- औषधि- अनुज्ञप्तिः निरस्ता कृता आसीत्। उच्चन्यायालयेन तथा सर्वोच्चन्यायालयेन अग्रिम-प्रत्याभूति- याचिकाः निरस्ताः कृताः अनन्तरं नालागढस्य न्यायालयेन जनवरी २०२४ मध्ये तान् पलायिताः इति घोषितम् आसीत्।

राज्यस्य राज्यसतर्कता एवं भ्रष्टाचारनिरोधकदलेन १ जुलाई २०२६ दिनाङ्के पत्रं लिखित्वा अस्य प्रकरणस्य अन्वेषणे स्वकीया असमर्थतां व्यक्तीकृता। सतर्कता-विभागस्य कथनम् अस्ति यत् तेषां समीपे जनशक्तेः, संसाधनानां तथा राजस्वविभागस्य कार्यप्रणाल्याः क्षेत्रविशेषज्ञानस्य अभावः अस्ति। अतः एतादृशस्य जटिलस्य वित्तीय- कपटव्यवहारस्य अन्वेषणं ते कर्तुं न शक्नुवन्ति।

# उद्घाटन-शिलान्यासयोः सांसदानां विधायकानां च आमन्त्रणम् अनिवार्यम्; पीएमजीएसवाई-कार्याणि सन्दर्भे केन्द्रस्य राज्येभ्यः कठोर-निर्देशाः




**हिमसंस्कृतवार्ता — नवदेहली।**
प्रधानमन्त्रि-ग्राम-सडक-योजनायाः (PMGSY) अन्तर्गतं निर्मीयमाणानां मार्गाणां शिलान्यास-उद्घाटन-समारोहेषु अधुना संसद्-सदस्यानां विधायकानां च आमन्त्रणे शिथिलता न सहिष्यते। ग्रामीण-विकास-मन्त्रालयेन सर्व-राज्येभ्यः केन्द्रशासित-प्रदेशेभ्यश्च अस्मिन् सन्दर्भे पुनः कठोराः निर्देशाः प्रसारिताः। मन्त्रालयेन स्पष्टीकृतं यत् पीएमजीएसवाई-कार्याणां शिलान्यास-उद्घाटन-कार्यक्रमेषु सम्बद्धाः निर्वाचिताः जनप्रतिनिधयः निर्धारित-शिष्टाचार-नियमानुसारेण (Protocol) समये एव आमन्त्रणीयाः। अस्मिन् सन्दर्भे ग्रामीण-विकास-मन्त्रालयेन सोमवासरे एकं पत्रम् अपि निर्गतम्।
वस्तुतः ग्रामीण-विकास-मन्त्रालयस्य दृष्टौ आगतं यत् बहुषु स्थानेषु एतेषां मार्गाणां शिलान्यास-उद्घाटन-समारोहेषु संसद्-सदस्याः न आमन्त्र्यन्ते। मन्त्रालयेन अयं विषयः गाम्भीर्येण स्वीकृतः तथा च पूर्वं निर्गतानां निर्देशाणां कठोर-पालनाय राज्येभ्यः आदेशाः दत्ताः।

## पञ्चदश-दिनेभ्यः पूर्वम् आमन्त्रणं प्रेषणीयम्

पत्रे निर्दिष्टं यत् शिलान्यास-उद्घाटन-समारोहात् न्यूनातिन्यूनं पञ्चदश (१५) दिनेभ्यः पूर्वं सर्वेभ्यः सम्बद्ध-जनप्रतिनिधिभ्यः निमन्त्रण-पत्रं प्रेषणीयं भविष्यति। एतदर्थं केवलम् एकस्मिन् एव साधने न निर्भर्तव्यम्, अपि तु ई-पत्रं (E-mail), पत्रं, सन्देशः (SMS) इत्यादीनां बहु-माध्यमानाम् उपयोगेन सूचना दातव्या। येन संसद्-सदस्याः विधायकाश्च समये एव सूचनां प्राप्य स्व-उपस्थितिं निश्चितां कर्तुं शक्नुयुः।
मार्गदर्शिकायाम् उक्तं यत् सम्बद्ध-लोकसभा-सांसदेन पीएमजीएसवाई-मार्गस्य शिलान्यासः उद्घाटनं च करणीयम्। कार्यक्रमस्य अध्यक्षता स्थानीय-मन्त्रिणा अथवा राज्यस्य शिष्टाचार-नियमानुसारेण अन्येन वरिष्ठ-जनप्रतिनिधिना मान्य-व्यक्तिना वा कर्तुं शक्यते। मन्त्रालयस्य कथनम् अस्ति यत् कार्यक्रमाः सामान्य-सर्वकारीय-समारोहवत् नियमानुसारम् आयोजनीयाः। यदि केनापि कारणेन सम्बद्धः संसद्-सदस्यः कार्यक्रमे भागं ग्रहीतुं न शक्नोति, तथापि विभागेन निमन्त्रण-प्रेषणस्य प्रक्रिया अवश्यमेव सम्पादनीया।

## डीपीआर-सहितं योजनीयाः निमन्त्रण-पत्राणां प्रतिकृतयः

मन्त्रालयेन स्पष्टीकृतं यत् एतादृशेषु प्रकरणेषु निमन्त्रण-पत्राणां प्रतिकृतयः (Copies) नूतन-विस्तृत-परियोजना-प्रतिवेदनेन (DPR) सह योजनीयाः भविष्यन्ति। अर्थात् संसद्-सदस्यस्य अनुपस्थितिम् आधारं कृत्वा निमन्त्रण-प्रक्रियायाः उपेक्षा कर्तुं न शक्ष्यन्ते। पत्रे प्रोक्तं यत् पीएमजीएसवाई-कार्याणां समीक्षणार्थं प्रयुक्ते 'ओमास' (OMMAS) इति पटले अपि कार्यक्रम-सम्बद्धानि चित्राणि आरोपणीयानि (Upload), येषु सम्बद्धः संसद्-सदस्यः उद्घाटन-शिलापट्टिका च स्पष्टतया दृश्येताम्। नूतन-प्रकल्पानां प्रस्तावेषु अपि सांसदेन कृतानां समारोहाणाम् अङ्कीय-चित्राणि (Digital Photos) अनिवार्यतया योजनीयानि।उल्लेखनीयं यत् मन्त्रालयेन उद्घाटन-शिलान्यास-समारोहाणाम् आयोजनाय प्रति-परियोजनाम् अधिकतमं विंशति-सहस्र-रूप्यकाणां (२०,०००) व्यय-सीमा निर्धारिता। केन्द्रेण सर्व-राज्यानां पीएमजीएसवाई-प्रभारिणः, मुख्य-अभियन्तारः, कार्यक्रम-क्रियान्वयन-घटकाश्च निर्देशाणां दृढ-पालनाय निर्दिष्टाः। मन्त्रालयेन पुनरुक्तं यत् जनप्रतिनिधिभ्यः अस्मिन् सन्दर्भे कापि अभियोग-वार्ता न आगच्छेत्।

# जनवरीमासे पूर्णं भविष्यति महत् कार्यम्, षड् दशमलोचनसप्त (६.७) कि.मी. मितदीर्घा भूमिगतमार्गः पारंगता भविष्यति; भानुपल्ली- रेलयानमार्गाय गतिः प्राप्स्यते

**हिमसंस्कृतवार्ताः- शिमला।** भानुपल्ली-बिलासपुर-बैरी-रेलयानमार्गपरियोजनायां ६.७ किलोमीटरमितदीर्घायाः कन्दरायाः अन्तिमविच्छेदस्य समयः समीपम् आगतः। जनवरी- २०२७ तमे वर्षे दशमसंख्याकस्य कन्दरायाः अन्तिमविच्छेदस्य लक्ष्यम् अस्ति। एकादशसंख्याका कन्दरा पूर्वमेव विच्छिन्ना जाता। इदानीम् दशमसंख्याकस्य कन्दरायाः खननकार्ये पूर्णे सति द्वे अपि कन्दरांशौ परस्परं संलग्नाव भविष्यतः। अनेन सह परियोजनायाः दीर्घतमायाः कंदरायाः मार्गः पारङ्गतः भविष्यति। दशमसंख्याकायाः कन्दरायाः दैर्घ्यं ३.८ किलोमीटरमितम् अस्ति, यदा तु एकादशसंख्याका सुरंगः २.३ किलोमीटरमिता दीर्घा वर्तते। द्वयोः सुरंगयोः संयोजनेन मध्यभागं च संवल्य संयुक्तसुरंगयाः कुलदैर्घ्यं ६.७ किलोमीटरमितं जातम्। पूर्वम् अस्मिन् परियोजनायाम् दशमसंख्याका कन्दराः दीर्घतमा आसीत्, किन्तु सम्प्रति दशमम् एकादशं च संयोज्य निर्मिता संयुक्तकन्दरा एव परियोजनायाः दीर्घतमा भूमिगतमार्गः भविष्यति।दशमसंख्याकायाः भूमिगतमार्गयाः निर्माणकार्यं तीव्रगत्या अग्रे वर्धमानम् अस्ति। तस्याः खननकार्यं चतुर्षु विभिन्नबिन्दुसु क्रियते। विभिन्नभागेषु कार्यसंचालनेन कन्दरायाः शीघ्रमेव पूर्तीकरणस्य प्रयासो वर्तते। जनवरीमासे तस्याः





अन्तिमविच्छेदोत्तरं ६.७ किलोमीटरमितः संयुक्तसुरंगमार्गः पूर्णः भविष्यति। खनन्कार्यस्य गत्यै त्रयः निष्क्रमणबिन्दवः अपि निर्मिते। तेषां उद्देश्यं कन्दरातः निःस्यमाणस्य अवशेषस्य बहिः प्रेषणप्रक्रियायाः त्वराकरणम् अस्ति। निष्क्रमणबिन्दुद्वारा अवशेषवाहनयानानां दीर्घमार्गस्य यात्रा न कर्तव्यो भविष्यति। ६.७ किलोमीटरमितायाः संयुक्तकन्दरायाः एकः महान् भागः पूर्वमेव सुसज्जितोऽस्ति। २.३ किलोमीटरमितायाः एकादशसंख्याकायाः सुरंगयाः विच्छेदः पूर्वमेव जातः। साम्प्रतं ३.८ किलोमीटरमितायाः दशमसंख्याकायाः कन्दरायाः अन्तिमविच्छेदोत्तरं द्वौ अपि भागौ संलग्नाव भविष्यतः। एवमेव जनवरीमासे भवितुम् अर्हन् दशमसंख्याकायाः सुरंगयाः विच्छेदः अस्य भागस्य कृते महत्त्वपूर्णो भविष्यति।
दशम- एकादश- सुरंगयोः मध्ये पूर्वं लगभग ५५० मीटरमितस्य दीर्घस्य पुलस्य निर्माणस्य योजना आसीत्। पश्चात् पर्वतीयपरिस्थितीन् अवलोक्य अस्य भागस्य योजनायां परिवर्तनं कृतं द्वे सुरंगे संयोजयितुं च निर्णयः स्वीकृतः। सम्प्रति पुलस्य स्थाने सुरंगमार्गद्वारा एव अस्य भागस्यतिक्रमणं भविष्यति।

**धरोटपर्यन्तं प्रचलति कार्यम्-**
परियोजनायां भानुपल्लीतः धरोटपर्यन्तं २१ किलोमीटरपर्यन्तं रेलपथस्य निर्माणकार्यं प्रचलति। थलू-पर्यन्तं कार्यं पूर्वमेव संपन्नम् अस्ति। धरोटपर्यन्तम् अपि दिसम्बरमासपर्यन्तं लक्ष्यं निर्धारितम्। अस्मिन्नेव वर्षे अस्य समापनं कमीशनिंगं च भविष्यति, धरोटपर्यन्तं च रेलयानस्य प्रारम्भस्य बाधा दूरीभविष्यति।

# बिहारवार्ता-: मखान्नकृषेः आधुनिक- व्यावसायिक- प्रारूपत्वेन विकासः सर्वकारस्य लक्ष्यम्






## मखान्न- विकास- योजनायाः नूतने स्तरे क्रियान्वयनम्; एकविंशति-जनपदानां कृषकाः प्राप्स्यन्ति लाभम्

**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्**

बिहारस्य मखान्नयाः वैश्विक-ख्याति-प्रदानाय कृषकाणाम् आय-संवर्धनाय च राज्य-सर्वकारेण उत्पादनतः आरभ्य प्रसंस्करण- मूल्यवर्धन- विपणनानि यावत् सम्पूर्णव्यवस्थायाः आधुनिकीकरणाय कार्यं क्रियते। 'मिथिला मखान्न' इति वैश्विक-विपणन-मुद्रात्वेन प्रतिष्ठापयितुं कृषि- विभागस्य उद्यान- निदेशालयेन वैज्ञानिक-कृषिः, उन्नत-बीजम्, आधुनिक-प्रसंस्करणम् तथा च मूल्यवर्धनस्य प्रोत्साहनाय बहवः महत्त्वपूर्णाः पदक्षेपाः स्वीक्रियन्ते। अस्मिन्नेव क्रमे राज्य- सर्वकारेण 'मखान्न-विकास-योजना' नूतने स्तरे विस्तारिता अस्ति। मान्यवर-कृषिमन्त्री विजयकुमार-सिन्हा अवदत् यत् मखान्न बिहारस्य गौरवम् अस्माकं सांस्कृतिक- अभिज्ञानञ्च वर्तते। राज्य- सर्वकारस्य लक्ष्यं मखान्न-कृषिं पारम्परिक- प्रारूपात् अग्रेसृत्य आधुनिक- व्यावसायिक- प्रारूपे परिणमयितुम् अस्ति। कृषकेभ्यः श्रेष्ठबीजानि, आधुनिक- प्रौद्योगिकी, वैश्विक-विपणि-प्रवेशः उपलभ्यते, येन बिहारस्य मखान्न जगतः प्रत्येकस्मिन् भागे प्रसरतु, कृषकाश्च स्वश्रमस्य समुचितं मूल्यं प्राप्नुयुः।

तेन प्रतिपादितं यत् वैश्विक-विपण्यां 'महा-आहार' रूपेण प्रख्यातस्य मखान्नयाः कुल-उत्पादने बिहारस्य सहभागिता पञ्चाशीति-प्रतिशतात् (८५%) अधिका वर्तते।'मखान्न-विकास-योजना' अन्तर्गतं राज्यस्य एकविंशति-उत्पादक-जनपदेषु वैज्ञानिकपद्धत्या मखान्न-उत्पादनाय आधुनिक- प्रसंस्करणाय च विशेषानुदानं प्रदीयते।

एतेषु जनपदेषु दरभंगा, मधुबनी, कटिहार, पूर्णिया, सहरसा, सुपौल, किशनगंज, सीतामढ़ी, मधेपुरा, अररिया, खगड़िया, समस्तीपुर, भागलपुर, सारण, सीवान, गोपालगंज, पूर्व- चम्पारण, पश्चिम- चम्पारण, मुजफ्फरपुर, वैशाली तथा च पाटलिपुत्रं च समाविष्टानि सन्ति।

व्ययस्य पञ्चसप्तति-प्रतिशतं (७५%) यावत्प्रत्यक्षानुदानम्; मूल्यवर्धित-उत्पादेषु बलम् मान्यवर-कृषि-मन्त्रिणा स्पष्टीकृतं यत् नूतन-क्षेत्रेषु विस्ताराय आधुनिक-प्रविधीनाम् अङ्गीकरणाय च राज्यसर्वकारेण व्ययस्य ७५ प्रतिशतं यावत् प्रत्यक्षानुदानं दीयते। एषा अनुदान-राशिः प्रत्यक्ष- लाभ- अन्तरण माध्यमेन कृषकाणां वित्तकोष- खातासु प्रेष्यते। परम्परागत-तड़ाग-पद्धत्या सह क्षेत्र-प्रणाल्याम् अपि उत्पादनं प्रोत्साह्यते। कृषकेभ्यः उच्च- उत्पादकतायुक्तायाः 'सबौर मखान्न- १', 'स्वर्ण वैदेही' चेति उन्नत-प्रजात्याः गुणवत्तापूर्णानि बीजानि प्रदीयन्ते। मखान्न- निष्कासनस्य स्फोटनस्य च श्रमसाध्य- पारम्परिकप्रक्रियायाः सुलभीकरणाय पारम्परिक- आधुनिक- उपकरण-सञ्चयस्य क्रयणे अपि ७५ प्रतिशतं यावत् अनुदानं प्राप्यते, येन समयस्य श्रमस्य च महती रक्षणं भवेत्। 'मिथिला मखान्न' इत्यस्य भौगोलिक-संकेतकं प्राप्य अमेरिका, यूरोप, खाड़ी-देशानां च विपणिषु संवर्धमानाः सम्भावनाः दृष्ट्वा कृषकाः न केवलं शुष्क- मखान्नयाः उत्पादने सीमिताः स्युः, अपि तु 'मखान्न-चूर्णं', सद्य- भोज्य- उत्पादानां निर्माणेन सम्बद्धाः क्रियन्ते।

सूक्ष्म- खाद्य- प्रसंस्करणोद्योगानां कृषक- उत्पादक- सङ्घट्टनानां च विकासाय 'पीएम- एफएमई' तथा 'राष्ट्रीय-मखान्न-मण्डल' सहयोगेन प्रसंस्करण-यन्त्रालय-संस्थापनाय, श्रेणीकरण- यन्त्राय संवेष्टनयन्त्राय च विशेष- वित्तीयसाहाय्यं प्रदीयते। मखान्न- विकास- योजनायाः लाभाय कृषकाः, कृषक- उत्पादक- सङ्घाः, महिला- स्वयं- सहायता- समूहाश्च उद्यान- निदेशालयस्य अधिकृतजालपुटे (horticulture.bihar.gov.in) अथवा 'बिहार- कृषि- अनुप्रयोगे' अन्तर्जाल-माध्यमेन आवेदनं कर्तुं शक्नुवन्ति; अधिकविवरणाय स्व- प्रखण्ड- उद्यानाधिकारिभिः सह सम्पर्कः करणीयः।

# जन-अभियोगानां निवारणाय निर्मिता भविष्यति उच्चप्रौद्योगिकी- प्रणाली, प्रत्येकस्य अभियोगस्य भविष्यति सतत- पर्यवेक्षणम्- मन्त्री नीतीशमिश्रः

**हिमसंस्कृतवार्ताः राघव नाथ झा, पाटलिपुत्रम्**



नगर- विकास एवम् आवासविभागः सामान्यजनानां जन- अभियोगानां त्वरित- समाधानाय प्रौद्योगिकी- आधारितम् प्रभावशालितन्त्रं सज्जीकरिष्यति। विभागीय- समीक्षा- गोष्ठ्यां नगर- विकासमन्त्री नीतीशमिश्रः अधिकारिणः समादिष्टवान् यत् स्वच्छता, जलावरोधः, अपशिष्ट-प्रबन्धनं, नगरनिकायैः सम्बद्धानां समस्यानां निवारणाय एतादृशी व्यवस्था विकसिता भवेत्, येन नागरिकाः सुगमतया स्व- अभियोगान् पञ्जीकर्तुं शक्नुयुः तेषां च समयबद्धं समाधानं सुनिश्चितं स्यात्। मन्त्रिणा प्रतिपादितं यत् अभियोग-प्राप्तेः आरभ्य तस्य निस्तारणं यावत् प्रत्येकस्मिन् स्तरे स्पष्टा उत्तरदायित्व-व्यवस्था प्रभावी पर्यवेक्षणं च भवेत्। सः अधिकारिभ्यः अभियोगानां प्रकृतेः, समाधाने प्रयुक्त-समयस्य अपि च पुनः पुनः आगच्छन्तीनां समस्यानाम् अन्वीक्षणं कृत्वा तासां स्थायी- समाधानाय व्यवस्था-निर्माणस्य निर्देशम् अददात्। अस्यां गोष्ठ्यां राज्यस्य सर्वेषां नगरनिकायानां नगर-कार्यपालकाधिकारिणां च कृते एका विशिष्टा कार्यशाला आयोजयितुं निर्णयः गृहीतः। अस्यां कार्यशालायां व्यावहारिक- समस्यानाम् अभिज्ञानं, तासां कारणानां विश्लेषणम् तथा च समाधानोन्मुख- अभ्यासमाध्यमेन व्यावहारिक- समाधान- निर्माणे बलं दीयते।

नीतीशमिश्रः अवदत् यत् नगरविकासस्य मूलोद्देश्यं केवलम् आधारभूतसंरचनायाः निर्माणं नास्ति, अपि तु नागरिकेभ्यः श्रेष्ठाः, सुलभाः समयबद्धाश्च सेवाः प्रदातुं वर्तते। विभागस्य प्राथम्यं नगर-निकायानां कार्यशैलीम् अधिकाधिकम् उत्तरदायित्वपूर्णां, प्रभाविनीं नागरिक-केन्द्रिताञ्च विधातुं वर्तते।

अस्यां समीक्षागोष्ठ्यां विभागस्य विशेषसचिवाः डॉ. नवलकिशोरचौधरी-महोदयाः, अपरसचिवाः मनोजकुमारमहोदयाः, विशेषसचिवाः मननराम- महोदयाः, अन्ये वरिष्ठाधिकारिणः, प्राविधिक- सहायता- समूहस्य च सदस्याः उपस्थिताः आसन्।



# नगरीयनिकाय-निर्वाचनस्य प्रचारः समाप्तः, मतदानाय सज्जाः मतदानदलानि

**जयपुरम्/भागलपुरम्**
**हिमसंस्कृतवार्ताः डॉ विमलेश झा**

राजस्थानस्य जयपुरसहितेषु प्रदेशस्य अन्येषु जनपदेषु प्रथमचरणे येषु नगरीयनिकायेषु मतदानं भविष्यति, तत्र अद्य निर्वाचनप्रचारस्य कोलाहलः समाप्तः अभवत्। सायं षड्वादनानन्तरं प्रत्याशिनां शोभायात्रा, जनसभा च आयोजयितुं निषेधः कृतः। अधुना प्रत्याशिनः केवलं व्यक्तिगतरूपेण गृहं गृहं गत्वा मतदातृभ्यः स्वपक्षे मतदानस्य आग्रहं कर्तुं शक्नुवन्ति। एतेषु नगरीयनिकायेषु सितम्बर-मासस्य ९ दिनाङ्के मतदानं भविष्यति। जयपुरे अष्टादशसु नगरीयनिकायेषु निर्वाचनाय मतदानदलानि श्वः, अर्थात् सितम्बरमासस्य अष्टमदिनाङ्के, प्रस्थानं करिष्यन्ति। जयपुरस्य सीकरमार्गस्थितात् भवानीनिकेतन-परिसरात् एतानि मतदानदलानि प्रेषयिष्यन्ते। द्वयोः चरणयोः एतानि मतदानदलानि प्रस्थास्यन्ति तथा च मतदानकेन्द्राणां व्यवस्थां स्वीकृत्य निर्वाचनकार्यं सम्पादयिष्यन्ति। मतदानदलानां प्रस्थानात् पूर्वं मतदानाय प्रयुज्यमानानां ईवीएमयन्त्राणां कमीशनिङ्गकार्यं सम्पन्नं कृतम्। जिला निर्वाचनाधिकारी सन्देशनायकस्य निरीक्षणे यन्त्राणां कमीशनिङ्गकार्यं सम्पादितम्।

येषु नगरीयनिकायेषु सितम्बरमासस्य ९ दिनाङ्के मतदानं भविष्यति, तेषु क्षेत्रेषु राज्यसर्वकारेण स्थानीयस्तरे सार्वजनिकावकाशः घोषितः अस्ति। अद्य सायं षड्वादनात् सितम्बरमासस्य नवमदिनाङ्कस्य सायं षड्वादनपर्यन्तं सम्बन्धितेषु नगरीयक्षेत्रेषु मद्यविक्रयः निषिद्धः इति घोषितः अस्ति। सितम्बरमासस्य नवमदिनाङ्के चोमूनगरपरिषदि, शाहपुरानगरपरिषदि च, तथा च दूदू, किशनगढ़रेनवाल, जोबनेर, बस्सी, सांभरलेक, वाटिका, चाकसू, जमवारामगढ़, फागी, नरायणा, फुलेरा, मनोहरपुर, बगरू, कानोता, खेजरोली तथा कालाडेरा इत्यादिषु नगरपालिकासु मतदानं भविष्यति। निर्वाचनप्रशासनं निष्पक्षं, शान्तिपूर्णं, सुव्यवस्थितं च मतदानं सुनिश्चितुं सर्वाः आवश्यकाः व्यवस्थाः सम्पन्नं कृतवान् अस्ति।

# राष्ट्रियताइक्वाण्डो क्रीडायां पटनासम्भागस्य गौरवपूर्णं प्रदर्शनम् — १६ सुवर्ण पदकानि सहितं ३५ पदकानि प्राप्तानि



**भागलपुरम् ०७/०९/२०२६**
**हिमसंकृतवार्ताः- डॉ विमलेश झा**

छत्तीसगढराज्यस्य डोंगरगढस्थे जवाहरनवोदयविद्यालये आयोजितायां राष्ट्रियताइक्वाण्डोक्रीडाप्रतियोगितायां–२०२६ नवोदयविद्यालयसमितेः पटनासम्भागस्य क्रीडकैः उत्कृष्टं प्रदर्शनं कृतम्। पटनासम्भागेन १६ सुवर्णपदकानि, १० रजतपदकानि तथा ९ कांस्यपदकानि, एवं समग्ररूपेण ३५ पदकानि प्राप्तानि। पटनासम्भागे बिहारराज्यस्य अतिरिक्तं झारखण्डपश्चिमबङ्गालराज्ययोः नवोदयविद्यालयाः अपि सम्मिलिताः सन्ति। विशेषतया पी.एम्. श्री जवाहर-नवोदय-विद्यालयः, बिहिया, भोजपुरः अस्यां प्रतियोगितायां उल्लेखनीयम् प्रदर्शनं कृतवान्। विद्यालयस्य क्रीडकैः ९ सुवर्णपदकानि, ५ रजतपदकानि तथा ४ कांस्यपदकानि, एवं १८ पदकानि प्राप्तानि। राष्ट्रिय-ताइक्वाण्डो-प्रतियोगितायां सुवर्णपदकं प्राप्तवन्तः क्रीडकाः अधुना School Games Federation of India (SGFI) इत्यस्य राष्ट्रियस्तरीयासु प्रतियोगितासु भागग्रहणाय चयनिताः सन्ति। ते विभिन्नेषु आयुवर्गेषु देशस्य विभिन्नेषु भागेषु आयोज्यमानासु एस. जी.एफ.आई. प्रतियोगितासु सहभागं करिष्यन्ति।अन्तर्-१४ बालकवर्गस्य प्रतियोगिता नागालैण्डे, अन्तर्-१४ बालिकावर्गस्य हिमाचलप्रदेशे, अन्तर्-१७ बालक-बालिकावर्गयोः प्रतियोगिता श्रीनगरजम्मू-कश्मीरप्रदेशे, तथा अन्तर्-१९ बालक-बालिकावर्गयोः प्रतियोगिता राञ्चीनगरे झारखण्डराज्ये आयोजयिष्यते। विद्यालयस्य दशमकक्षायाः छात्रा डिम्पल-कुमारी विशिष्टाम् उपलब्धिं प्राप्तवती। तया उत्कृष्टं प्रदर्शनं कुर्वत्या 'उत्कृष्ट-क्रीडक' इति पुरस्कारः प्राप्तः। तस्याः भारतीयताइक्वाण्डोदलस्य चयनार्थं आयोज्यमाने परीक्षणाय (ट्रायल) अपि चयनं जातम्। तस्याः उपलब्धिः भोजपुरजनपदस्य कृते गौरवस्य विषयः अस्ति।

**सुवर्णपदकविजेतृणां सूची**

बिहिया-जवाहर-नवोदय-विद्यालयस्य सुवर्णपदकविजेतृषु सोनमचन्द्रा (दशमी), डिम्पलकुमारी (दशमी), संगिनी-कुमारी (दशमी), रोहिणीराज (दशमी), सुप्रियाकुमारी (दशमी), स्वाति-कुमारी (नवमी), मोहितकुमार (नवमी), रजनीकान्तः (एकादशी), अङ्कुमारः (अष्टमी) तथा अनमोलकुमारः (अष्टमी) सम्मिलिताः सन्ति।

क्रीडकानां अस्याः सफलतायाः पृष्ठे विद्यालये सञ्चाल्यमानस्य नियमितताइक्वाण्डोप्रशिक्षणस्य महत्त्वपूर्णं योगदानम् अस्ति। प्रशिक्षकयोः हर्ष-उज्ज्वलस्य निखिल-कुमारस्य च मार्गदर्शने तथा दलप्रबन्धिका हेमलता एन.एच. इत्यस्याः व्यवस्थापने क्रीडकाः प्रशिक्षणं प्राप्तवन्तः। सम्पूर्णः प्रशिक्षणकार्यक्रमः विद्यालयस्य प्राचार्यस्य प्रभास-चन्द्र-रायस्य निर्देशने सञ्चालितः।

**विद्यालये विजेतृक्रीडकानां भव्यं स्वागतं**

राष्ट्रियस्तरीयायां प्रतियोगितायां उत्कृष्टं प्रदर्शनं कृत्वा विद्यालयं प्रत्यागतानां क्रीडकानां प्राचार्येण, शिक्षकैः तथा छात्र-छात्राभिः उत्साहपूर्वकं स्वागतं कृतम्। विजेतृक्रीडकानां उपलब्ध्या विद्यालयपरिसरे हर्षोल्लासस्य वातावरणं जातम्। अवसरे प्राचार्यः प्रभास-चन्द्र-रायः उक्तवान्—"एषा उपलब्धिः विद्यार्थिनां प्रतिभायाः, कठिनपरिश्रमस्य, अनुशासनस्य तथा प्रशिक्षकाणां समर्पितप्रयासस्य फलम् अस्ति। अस्माकं क्रीडकाः आगामीषु एस्.जी.एफ्.आई. तथा अन्तर्राष्ट्रीयस्तरीयासु प्रतियोगितासु अपि उत्कृष्टं प्रदर्शनं कृत्वा विद्यालयस्य, नवोदय-विद्यालय-समितेः तथा बिहारस्य नाम गौरवान्वितं करिष्यन्ति" इति।सः सर्वेभ्यः विजेतृक्रीडकेभ्यः आगामीप्रतियोगिताभ्यः हार्दिकाः शुभकामनाः प्रदत्तवान्।

## प्रतिनिधिमण्डलेन सह सकारात्मक-वार्तायाः अनन्तरम् अधिकारिभ्यः प्रक्रिया-त्वरणाय निर्देशः; अभ्यर्थिनां हितं सर्वोपरि इति उद्घोषितम्

**हिमसंस्कृतवार्ताः राघवनाथ झा, पाटलिपुत्रम्।** बेल्ट्रॉन माध्यमेन चयनितेभ्यः ४,८०८ आँकड़ा- प्रविष्टि-सञ्चालकेभ्यः सान्त्वनापूर्णा वार्ता प्राप्ता अस्ति। बिहार-सर्वकारस्य सूचना- प्रौद्योगिकी- मन्त्री नीतीशमिश्रमहोदयः सोमवासरे अभ्यर्थिनां प्रतिनिधिमण्डलेन सह मेलनं कृत्वा तेषां समस्याः अशृणोत्, विभागीय- अधिकारिभ्यः आवश्यक- प्रक्रियासु त्वरां समागत्य शीघ्रमेव अधिकृत-सूचनां निर्गमयितुं निर्दिष्टवान्। अस्यां समाहूतायां गोष्ठ्यां बेल्ट्रॉनसंस्थायाः प्रबन्धनिदेशकाः कौशलकिशोरमहोदयाः, विभागस्य वरिष्ठाधिकारिणः उपस्थिताः आसन्। प्रतिनिधिमण्डलेन नियोजनप्रक्रियया सम्बद्धानि लम्बितानि प्रकरणानि मन्त्रिणः समक्षं स्थापितानि, येषु विस्तरेण विमर्शः जातः। मन्त्री नीतीशमिश्रः अकथयत् यत् सर्वकारः अभ्यर्थिनां हिताय पूर्णतया संवेदनशीलः अस्ति। युवानाम् आकाङ्क्षाः अवसरेषु परिणमयितुं सर्वकारस्य प्राथमिकता वर्तते, मुख्यमन्त्रिणः कुशलनेतृत्वे रोजगार- सम्बद्ध- विषयाणां त्वरित-समाधानं सुनिश्चितं क्रियते।

# खरवारसमाजस्य ऐक्यं शिक्षा च संस्कृतिसंरक्षणस्य सन्देशः






**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः**

***मालदामहाविद्यालयस्य सभागारे खरवार- आदिवासी- कल्याण- समितेः वार्षिकसामान्यसभा तथा 'खरवार ग बात' इति मुखपत्रस्य प्रकाशनम्***

गतरविवासरे ऐक्यम्, अधिकारः, शिक्षा, स्वकीयभाषायाः संस्कृतेश्च संरक्षणम् इत्येतान् विषयान् पुरस्कृत्य खरवार- आदिवासी- कल्याण-स मितेः वार्षिकसामान्यसभा तथा समितेः मुखपत्रस्य 'खरवार ग बात्' इत्यस्य प्रकाशनसमारोहः अत्यन्तम् उत्साहेन आनन्देन च सम्पन्नः अभवत्। मालदामहाविद्यालयस्य सभागारस्य 'सानाउल्लाह-मञ्चे' मध्याह्ने एकवादने सभा आयोजिता। अस्यां सभायां खरवारसमाजस्य विविधाः महत्त्वपूर्णाः सङ्गटनात्मकाः सामाजिकाश्च विषयाः विस्तरेण चर्चिताः। अस्मिन् कार्यक्रमे विशिष्टातिथिरूपेण बिहारसर्वकारस्य अनुसूचित-जनजाति- आयोगस्य सदस्यः राजू-खरवारः, अखिलभारतीय- खरवार- सङ्घस्य सम्पादकः विश्वनाथ खरवारः, सहसम्पादकः सञ्जीव-सिंहः, सङ्गटनसम्पादकः सन्दीपसिंहः खरवारः, राष्ट्रिय-विधि- परामर्शदाता सौरभ खरवारः उपस्थिताः आसन्। अपि च खरवार- आदिवासी- कल्याण-समितेः नेतारः, सदस्याः, समाजस्य बहवः विशिष्टाः जनाश्च उपस्थिताः आसन्। सभायां खरवारसमाजस्य सङ्गटनस्य शक्तिवर्धनम्, अनुसूचितजनजाति- प्रमाणपत्रस्य प्राप्तिः, तस्य सत्यापनसम्बन्धिनः विविधाः समस्याः, शिक्षा, छात्राणां छात्रवृत्तिः, युवकानां युवतीनां च रोजगारः, खरवारसमाजस्य स्वकीयभाषायाः, परम्परायाः, संस्कृतेश्च संरक्षणम् इत्यादयः विषयाः विस्तरेण चर्चिताः। वक्तारः मन्यन्ते यत् समाजस्य समग्रविकासाय सङ्गटनात्मकम् ऐक्यम्, शिक्षायाः प्रसारः, स्वकीयभाषायां संस्कृतौ च गाढः अनुरागः अत्यन्तम् आवश्यकः। समितेः अध्यक्षस्य निवारणचन्द्रमण्डलस्य स्वागतभाषणेन सभायाः औपचारिकः आरम्भः अभवत्। सः समाजस्य जनान् ऐक्येन स्वकीयाधिकाराणां विकासस्य च कृते अग्रे गन्तुं आह्वानम् अकरोत्। समितेः सम्पादकः चैतन्यमण्डलः स्वभाषणे अवदत्- "अस्माकं समाजस्य विकासाय सर्वैः ऐक्येन कार्यं कर्तव्यम्। ऐक्यपूर्णप्रयत्नं विना समाजस्य वास्तविकः विकासः कदापि सम्भवः न भवति।" तस्य भाषणे सङ्गटनस्य शक्तेः सामाजिकैक्यस्य च महत्त्वं विशेषरूपेण प्रकाशितम्। अखिलभारतीय- खरवार- सङ्घस्य सम्पादकः विश्वनाथ खरवारः अवदत्- "सम्पूर्णे भारतवर्षे खरवारसमाजस्य जनान् ऐक्येन शिक्षया च योजयितुम् अस्माभिः कार्यं निरन्तरं कर्तव्यम्।" तस्य भाषणे शिक्षायाः प्रसारस्य अखिलभारतीयस्तरे सामाजिकैक्यस्य निर्माणस्य च दृढः सङ्कल्पः प्रकाशितः। बिहारसर्वकारस्य अनुसूचितजनजाति- आयोगस्य सदस्यः राजू खरवारः अवदत्- "सम्पूर्णे भारतवर्षे खरवारीभाषया रचितं प्रथमं पत्रम् 'खरवार ग बात' इति अस्ति। अस्य परम्परां रक्षितुं वयम् अवश्यमेव प्रयत्नं कुर्मः।" तस्य भाषणे स्वकीयभाषायां प्रकाशनस्य महत्त्वं, भाविपीढ्यै भाषायाः संस्कृतेश्च परम्परां प्रदातुम् आह्वानं स्पष्टतया श्रुतम्। कार्यक्रमस्य एकः महत्त्वपूर्णः भागः आसीत् समितेः मुखपत्रस्य 'खरवार ग बात्' इत्यस्य औपचारिकं प्रकाशनम्। अस्मिन् पत्रे खरवार-आदिवासीनां इतिहासः, दीर्घः सङ्घर्षः, स्वकीया भाषा संस्कृतिश्च, तथा कविता, गीतानि, कथाः, आख्यानानि, नाटकानि विविधविषयकाः लेखाश्च प्रकाशिताः सन्ति। अतः एतत् केवलं पत्रं न, अपि तु खरवारसमाजस्य इतिहासस्य, परम्परायाः, स्वपरिचयस्य सांस्कृतिकचेतनायाश्च महत्त्वपूर्णं प्रपत्रम् अस्ति। पत्रस्य सम्पादकः, खरवारजनजातीयः विशिष्टः लेखकश्च सञ्जयकुमार मण्डलः अवदत्- "खरवार- आदिवासीनां भाषां संस्कृतिं च रक्षितुं पत्रस्य महत्त्वम् अत्यधिकम् अस्ति। अस्य पत्रस्य माध्यमेन वयम् अस्माकं समाजस्य समस्याः अपि बृहत्तरसमाजस्य पुरतः प्रकाशयितुं शक्नुमः।" सभायां वक्तॄणां भाषणेषु पुनः पुनः एषः विषयः प्रकाशितः यत् स्वकीयभाषायाः संस्कृतेश्च लोपे कस्यचित् जनसमुदायस्य विशिष्टपरिचयस्य महत्त्वपूर्णः अंशः अपि नश्यति। अतः नवीनपीढीं शिक्षितां सचेतनां च कृत्वा तां स्वकीय-इतिहासेन, भाषया, साहित्येन, लोकसंस्कृत्या, परम्परया च निकटतया योजयितुम् आवश्यकम् अस्ति। अतः अस्य दिवसस्य सभा केवलं वार्षिकसामान्यसभा वा पत्रप्रकाशनसमारोहः एव न आसीत्। अपि तु सा खरवारसमाजस्य अधिकारचेतनायाः, शिक्षाप्रसारस्य, सङ्गटनात्मकैक्यस्य, भाषासंस्कृतेश्च संरक्षणस्य दृढसङ्कल्पस्य मञ्चः अभवत्। स्वकीयपरम्परायाः मूलानि दृढतया धारयित्वा आधुनिकतायाः मार्गे अग्रे गन्तुं दृढसङ्कल्पेन सभा समाप्तिम् अगच्छत्।

# राष्ट्रीयक्रीडादिवसस्य प्रतियोगितासु डीपीएस बोकारो विद्यालयस्य उत्कृष्टं प्रदर्शनम्

**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।**

सेल-बोकारो इस्पातसंयन्त्रस्य आयोजनेन सम्पन्नासु राष्ट्रीयक्रीडादिवसस्य प्रतियोगितासु दिल्ली पब्लिक स्कूल, बोकारो विद्यालयस्य विद्यार्थिभिः उत्कृष्टं प्रदर्शनं प्रदर्शितम्। विंशत्यधिकविद्यालयानां विद्यार्थिभिः सह सम्पन्नासु विविधासु प्रतियोगितासु डीपीएस बोकारो-विद्यालयस्य विद्यार्थिनः क्रीडाक्षेत्रे अनेकान् शीर्षस्थान् प्राप्तवन्तः। एतेषु धावनक्रीडा, सामूहिकक्रीडा, अन्तर्गृहक्रीडा च अन्तर्भवन्ति। गोलेनिक्षेपण-प्रतियोगितायां बालकवर्गे देवराजः प्रथमस्थानं प्राप्तवान्, रेहान अहमदः च द्वितीयस्थानं प्राप्तवान्। बालिकावर्गे वृद्धिः श्रीवास्तवा प्रथमस्थानं प्राप्तवती, त्रिनयना च उपविजेतृपदं प्राप्तवती। पादकन्दुकक्रीडायां श्रेयस ठाकुरः, प्रतीक रञ्जनः, हर्षवर्धनः, मो. अरहम जाकी इत्येतैः सदस्यैः युक्तं विद्यालयस्य दलम् उत्कृष्टं सामूहिकप्रदर्शनं कृत्वा बालकवर्गस्य विजेतृपदं प्राप्तवत्। बैडमिण्टन-क्रीडायामपि डीपीएस बोकारो-विद्यालयस्य विद्यार्थिनः उल्लेखनीयं प्रदर्शनं कृतवन्तः। बालिकावर्गे सान्वी शेखरः प्रथमस्थानं प्राप्तवती, आस्था च उपविजेतृपदं प्राप्तवती। बालकवर्गे अङ्कितकुमारः विजेतृपदं प्राप्तवान्। शतरञ्जक्रीडायां बालकवर्गे अक्षतसिंहः प्रथमस्थानं प्राप्तवान्, अबीर धींगरा च उपविजेतृपदं प्राप्तवान्। विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवारः विजेतृभ्यः विद्यार्थिभ्यः हार्दिकं अभिनन्दनं ज्ञापयन् तेषां क्रीडासक्तिं, परिश्रमं तथा उत्साहं च प्रशंसितवान्। सः अवदत् यत् अद्यत्वे प्रौद्योगिक्या प्रेरिते तथा निष्क्रियजीवनशैल्या प्रभाविते युगे क्रीडाः शारीरिकसक्रियतायाः सामाजिकसम्पर्कस्य च महत्त्वपूर्णं माध्यमं सन्ति। क्रीडाः विद्यार्थिषु शारीरिकस्वास्थ्यं, अनुशासनं, सहयोगभावनां तथा सामाजिकसम्बन्धान् सुदृढान् कुर्वन्ति।



# दुर्गापूजा-समितिभ्यः

## एकलक्षरूप्यकाणाम् अनुदानम्, निःशुल्का विद्युद्व्यवस्था च

### महाष्टम्यां मद्यविक्रयणकेन्द्राणि मद्यशालाश्च पिहितानि भविष्यन्ति



**कोलकाता/भागलपुर ७ सितम्बर २०२६। हिमसंस्कृतवार्ताः डॉ विमलेश झा**

पश्चिमबङ्गसर्वकारेण अस्मिन् वर्षे दुर्गापूजायाः आयोजकसमितिभ्यः विशेषानुदानस्य घोषणा कृता अस्ति। लघुपूजासमितिभ्यः, येषां कृते सर्वकारीयसहायतां विना पूजायाः आयोजनं कठिनं भवति, एकलक्षरूप्यकाणि अनुदानरूपेण प्रदास्यन्ते। अनुदानस्य प्राप्त्यर्थं पूजासमितिभिः स्थानीयपुलिसस्थानके आवेदनं करणीयम्। मुख्यमन्त्रिणा शुभेन्दु-अधिकरिणा पूजासमितिभिः सह आयोजितायां समीक्षासभायां दुर्गापूजायाः व्यवस्थाः, सुरक्षा च विषये विस्तृतचर्चा कृता। बृहदायव्ययपत्रकयुक्ताभ्यः पूजासमितिभ्यः सर्वकारीयम् आर्थिकानुदानं न स्वीकर्तुं मुख्यमन्त्रिणा आह्वानं कृतम्।

पुनश्च दुर्गापूजावसरे महाष्टम्यां सम्पूर्णे राज्ये सर्वाणि मद्यविक्रयणकेन्द्राणि मद्यशालाश्च पिहितानि भविष्यन्ति। दुर्गापूजायाः विसर्जनसमये वा तदनन्तरं वा राज्ये कुत्रापि विशालध्वनिविस्तारकयन्त्रस्य संचालनस्य अनुमतिः न भविष्यति। पूजायाः शोभायात्रया वा अन्येन कार्यक्रमेण वा राष्ट्रियमार्गेषु यातायातव्यवस्था बाधिता न कर्तव्या इति अपि सर्वकारेण निर्देशः प्रदत्तः। पूजासमितिभ्यः विद्युदुपयोगस्य कृते शुल्कं न गृह्यते इति मुख्यमन्त्रिणा घोषितम्। कोलकातानगरे पूर्वं पूजासमितिभ्यः विद्युद्वारस्य अशीतिप्रतिशतम् अनुदानं प्रदीयते स्म, मण्डलेषु च विद्युद्वारः न गृह्यते स्म। अधुना कोलकातासहिते सम्पूर्णे राज्ये पूजासमितिभ्यः निःशुल्कविद्युद्व्यवस्थां प्रदातुं विद्युद्वितरणसंस्थाभिः सह वार्ता सम्पन्ना अस्ति। पूजामण्डपानां कृते अग्निशमनविभागात् अनुमतिप्राप्त्यर्थमपि पूजासमितिभ्यः किमपि शुल्कं न गृह्यते। सर्वकारेण दुर्गापूजायाः निर्विघ्नं सुरक्षितं च आयोजनं सुनिश्चितुं विविधाः व्यवस्थाः क्रियन्ते। सर्वाभिः पूजासमितिभिः २४ अक्तूबरपर्यन्तं दुर्गाप्रतिमानां विसर्जनं अनिवार्यतया करणीयम् इति निर्देशः प्रदत्तः अस्ति। प्रशासनं पूजासमितयश्च परस्परसमन्वयेन उत्सवस्य शान्तिपूर्णं सुव्यवस्थितं च आयोजनं करिष्यन्ति।

# डॉ. सर गङ्गानाथझावाचनालयपरिसरे जन्मोत्सवेऽपूर्वा प्रसासः, रक्तदानमाध्यमेन प्रदत्तः मानवतायाः सन्देशः




## विक्कीमण्डलेन जन्मोत्सवः कृतः जनसेवापर्व; पञ्चविंशतिजनैः कृतं रक्तदानम्, पत्रकाराः सामाजिकप्रतिभाश्च समादृताः।

**हिमसंस्कृतवार्ता : राघव नाथ झा, पण्डौलः**

जन्मोत्सवं केवलं वैयक्तिकोल्लासाय सीमितम् अकृत्वा तं मानवसेवा- सामाजिकोत्तरदायित्व- जनजागरणसङ्कल्पैः योजयितुम् 'अयाची- नगरयुवा- प्रतिष्ठानस्य' (अयाची- नगर- युवा- फाउण्डेशनस्य) संस्थापकेन विक्कीमण्डलेन एका अनुकरणीया पहलः कृता। स्वजन्मोत्सवस्यावसरे पण्डौलस्थे डॉ. सर गङ्गानाथझावाचनालयपरिसरे रक्तदानशिबिरस्य सहैव पत्रकारसम्मानसमारोहस्य भव्यम् आयोजनं सम्पन्नम्। अनेनायोजनेन समाजसेवा- संवेदना- सहभागितानाम् एकम् उत्कृष्टमुदाहरणं प्रस्तुतम्। अस्मिन् कार्यक्रमे मण्डलस्य (जनपदस्य) पत्रकाराः, यूट्यूब- दृश्यश्रव्यमाध्यमप्रयोक्तारः, प्रभावशालिनः व्यक्तयः, विषयनिर्मातारः (कण्टेण्ट- क्रिएटर्स), पत्रकारिता- सङ्गणकीयमाध्यम- सामाजिकक्षेत्रेषु श्लाघनीययोगदानकर्तारः विद्वांसः अङ्गवस्त्रप्रशस्तिपत्रादिभिः समादृताः। तत्रैव रक्तदानशिबिरे पञ्चविंशतिः (२५) युवानः स्वेच्छया रक्तदानं कृत्वा मानवतायै स्वप्रतिबद्धतां प्राकटयन्।

कार्यक्रमस्य मुख्यातिथयः पण्डौलस्य प्रखण्डविकासपदाधिकारिणः (बीडीओ) शुभमप्रकाशमहोदयाः, विशिष्टातिथयः राजस्वपदाधिकारिणी (आरओ) निकितागुप्ता तथा च लेखापरीक्षापदाधिकारिणी (ऑडिट-अधिकारी) रानीराजमहोदया आसन्। विकाससाहू, प्रवीणझा, रमेशठाकुर, अभिषेकठाकुर, सञ्जीवझा, अमलझा इत्यादयः बहवः विशिष्टाः नागरिकाश्च समुपस्थिताः आसन्। अवसरेऽस्मिन् प्रखण्डविकासपदाधिकारी शुभमप्रकाशः प्रतिष्ठानस्य कार्याणां प्रशंसां कुर्वन् अवदत् यत् रक्तदानसदृशाः पदक्षेपाः समाजे मानवीयसंवेदनां सेवाभावञ्च सुदृढं कुर्वन्ति। युवनां सक्रियसहभागेन सामाजिककार्यक्रमाः नूतनां गतिं प्राप्नुवन्ति। लेखापरीक्षापदाधिकारिणी रानीराजमहोदया महिलाः अपि रक्तदानाय प्रेरयन्ती न्यवेदयत् यत् समाजे रक्तस्यावश्यकतां वीक्ष्य महिलाभिरपि अस्मिन् पुण्यकर्मणि अग्रेसरणीयं, यतो हि स्वस्थजनानां कृते रक्तदानं सर्वथा निरापदं भवति। राजस्वपदाधिकारिणी निकितागुप्ता अवदत् यत् वैयक्तिकपर्वणः समाजसेवया सह सङ्गमः अतीव श्लाघनीयः वर्तते।

प्रतिष्ठानस्य संस्थापकः विक्कीमण्डलः संस्थायाः सङ्कल्पं प्रकटयन् अकथयत्- "प्रतिगृहं रक्तदाता भवेत्, रक्ताभावेन च कस्यापि जीवनं न प्रणश्येत्।" जन्मोत्सवेन सह रक्तदानयोजनस्य मुख्यमुद्देश्यं केवलम् एकदिवसीयकार्यक्रमः नास्ति, अपि तु समाजे नियमितरक्तदानसंस्कृतेः मानवीय-संवेदनायाश्च संवर्धनं वर्तते। आपत्काले दीयमानं रक्तं केवलं रक्तं न, अपि तु जीवनरक्षायै अस्माकं मानवीयोत्तरदायित्वस्य जीवन्तं प्रमाणम् अस्ति।

रक्तदानकर्तृषु अखिलेशकुमारमण्डलः, अङ्कितकुमार झा, अमलकुमार झा, पङ्कजकुमारझा, दीपककुमारमण्डलः, राहुलकुमारः, प्रदीपकुमारयादवः, गोपालमण्डलः, नारायणचौधरी, राहुलकुमारसफी, विनयकुमारगिरी, प्रवीणकुमारमण्डलः, उमेशकुमारशर्मा, रुद्रानन्दझा, विद्यानन्दः, मुकेशकुमारझा, अनुजकुमारझा, विनयकुमारझा इत्यादयः प्रमुखाः आसन्। जीवनस्योत्सवः तदैव सार्थकः भवति यदा तस्य सुखम् अन्येषां जीवने आशाम् आनन्दञ्च सञ्चारयति इति सन्देशम् अयमायोजनः समाजे प्रसारितवान्।

# संस्कृताश्रिता, संस्कृतमयी 'कः भवति बृहस्पतिः?' इति प्रतियोगिता आयोजिता







**हिमसंस्कृतवार्ताः - रामटेकम्।**
संस्कृतसप्ताहस्य अवसरे भारतीयज्ञानपरम्पराकेन्द्रस्य 'कौन बनेगा करोड़पति' इत्यस्य संकल्पनायाः आधारेण पूर्णतः संस्कृतभाषायाम् आयोजिता 'कः भवति बृहस्पतिः?' इति प्रतियोगिता संस्कृतसप्ताहे डॉ. तोतड़े-सभागृहे अत्यन्तमुत्साहपूर्णे वातावरणे आयोजिता। कालिदास-संस्कृत-विश्वविद्यालयस्य शोधकार्यं परम्पराधिष्ठित-नवाचारम् आधृतम् अस्ति। अस्यैव नवाचारस्य सुन्दरम् आविष्कारः अस्याः प्रतियोगितायाः माध्यमेन द्रष्टुं प्राप्तः।
इयं त्रिदिवसीया प्रतियोगिता क्रमशः विद्यालयस्तरे, महाविद्यालयस्तरे तथा विश्वविद्यालयस्तरे आयोजिता। नागपुरं तथा रामटेकं स्थितेभ्यः विभिन्नेभ्यः विद्यालयेभ्यः महाविद्यालयेभ्यश्च अस्यै प्रतियोगितायै स्फूर्तिपूर्णः उत्कृष्टश्च प्रतिसादः प्राप्तः।
भारतीयधर्म-दर्शन-संस्कृतिसंकायस्य अधिष्ठात्री प्रो. कलापिनी अगस्ती इत्यस्याः संकल्पनया संस्कृतमयः 'कः भवति बृहस्पतिः?' इति कार्यक्रमः साकारः अभवत्। भारतीयपरम्परायां बृहस्पतिः ज्ञानस्य देवतारूपेण मन्यते। तं 'सकलज्ञानराशिः' इत्यपि सम्बोध्यते। अतः संस्कृतविश्वविद्यालये ज्ञानश्रेष्ठस्य बृहस्पतेः आदर्शं पुरतः स्थापयित्वा एतादृशी प्रतियोगिता आयोजयितुं स्वाभाविकमेव अस्ति।
विभिन्नानां शास्त्राणां, लौकिकविषयाणां तथा सामान्यज्ञानस्य परीक्षां कुर्वत्यां अस्यां ज्ञानक्रीडायां धनराशेः महत्त्वं न दत्त्वा ज्ञानस्य उपासनां कुर्वद्भ्यः संस्कृतस्य श्रेष्ठविद्यार्थिभ्यः 'बृहस्पतिः' इति उपाधिः प्रदीयते। डॉ. तोतड़े-सभागृहे सुन्दरप्रकाशव्यवस्थया सुसज्जितं विशालं मञ्चम्, चयनितप्रतिभागिविद्यार्थिनां कृते विशेषा आसनव्यवस्था तथा घूर्णनशीलायां आसन्दिकायां साक्षाद् अमिताभ-बच्चनस्य भूमिकायां, किन्तु स्वदेशीयं धौतवस्त्रं करांशुकम् च पुणेरी-पगडीं च धृत्वा स्थितः डॉ. सुमित-कठाळे—तथा सम्पूर्णः संवादः, प्रश्नोत्तरं च केवलं संस्कृतभाषायाम्!
संस्कृतस्य, संस्कृतसम्बद्धविषयाणां तथा सामान्यज्ञानस्य आधारेण विभिन्नानां प्रश्नानाम् उत्तरदानाय दश समूहाः चयनिताः। प्रत्येकस्मिन् समूहे द्वौ विद्यार्थी आस्ताम्। एतेषां समूहानां प्रारम्भिकपरीक्षायाः अनन्तरं एकः चयनितः समूहः मुख्यासने उपवेश्यते, ततः प्रारभ्यते 'केबीसी'-शैल्याः रोचकं प्रश्नोत्तर-सत्रम्। क्रीडायाः प्रारम्भः क्रीडायाः नियमाणां तथा त्रयाणां जीवनरेखाणां परिचयेन क्रियते।कार्यक्रमे वास्तविकं वर्णं डॉ. सुमित-कठाळे-महोदयस्य जीवन्तेन, सरसेन, रोचकेन च विनोदमिश्रितेन संस्कृतसंवादेन आगतम्। प्रतियोगिनः लघुभिः शब्दविनोदाः माध्यमेन क्रीडायाः प्रभावात् मुक्ताः करणीयाः, सहजतया वातावरणं मनोरञ्जकं करणीयम्, मध्ये मध्ये किञ्चित् दुविधां रोमाञ्चं च जनयितुम्, जीवनरेखाणां प्रयोगे मार्गदर्शनं कर्तुम् तथा केबीसी-शैल्याः पार्श्वसङ्गीतं तकनीकीसहयोगश्च—एतेषां सर्वेषां कारणानां प्रतियोगिता अत्यन्तमाकर्षिका अभवत्।
अनेकानां रोचकानां तथा कदाचित् उत्तरस्य विषये संशयं जनयतां प्रश्नानां प्रतिभागिसमूहैः सहजतया आत्मविश्वासेन च उत्तरं दत्तम्। आवश्यकतायां जीवनरेखाणां प्रयोगं कुर्वन्तः विद्यार्थिनः प्रतियोगितां निरन्तरं जीवन्तां कृतवन्तः।
अस्यां प्रतियोगितायां विद्यार्थिभिः अत्यन्तमुत्साहेन, उल्लासेन उर्जस्वितमा च प्रतिसादः प्रदत्तः। अनेकानां विद्यार्थिनाम् उत्साहपूर्णाभिः प्रतिक्रियाभिः सभागृहं प्रतिध्वनितम्। सर्वे प्राध्यापकाः अपि अस्मिन् उत्साहे सहभागिनः अभवन् तथा विद्यार्थिनाम् आत्मविश्वासं वर्धयन्तः तेषां प्रोत्साहनं कृतवन्तः। जीवनरेखाप्रणाल्याः अन्तर्गतं विद्यार्थिभिः स्वशिक्षकेभ्यः गृहीता सहायता तथा शिक्षकैः उत्साहपूर्वकं कृता सहायता अपि विशेषप्रशंसां प्राप्तवती।
कल्पनाशीलतायाः, सृजनात्मकतायाः तथा कार्यकुशलतायाः बलेन विना अधिकव्ययं उपलब्धसंसाधनानां प्रभावी उपयोगं कुर्वन् कस्याः अपि उत्कृष्टसंकल्पनायाः साकारं करणं कथं शक्यते, तस्य एतत् एकम् आदर्शोदाहरणम् अस्ति—'कः भवति बृहस्पतिः?'
संस्कृतस्य नवीनसंकल्पनानां च समन्वयः विद्यार्थिभ्यः कियत् प्रेरणादायकः भवितुम् अर्हति तथा संस्कृतमये संस्कृतसप्ताहे कथं नूतनशक्तेः सञ्चारं कर्तुं शक्नोति, तस्य सुन्दरः अनुभवः अस्य आयोजनस्य माध्यमेन प्राप्तः।
प्रत्येकस्मिन् स्तरे प्रो. कविता-होले, अधिष्ठात्री, संस्कृत-संस्कृतेतरभाषासंकायस्य तथा अन्येषां मान्यवराणां शुभहस्तेन विजेतृभ्यः पुरस्काराः प्रदत्ताः। सर्वेभ्यः प्रतिभागिविद्यार्थिभ्यः प्रमाणपत्राणि प्रदत्तानि।

## प्रतियोगितायाः परिणामाः

### विद्यालयस्तरः

१. प्रथमक्रमाङ्कः — भवन्स एनटीपीसी, मौदा
सारा सहारे, योहांस कांबळे
२. द्वितीयक्रमाङ्कः — सोमवार हाईस्कूल, निखिलस मीरा कुलकर्णी, अभिजात त्रिफळे
३. तृतीयक्रमाङ्कः — रिलायंस फाउण्डेशन स्कूल, मौदा रोहित दत्ता, कृषद धावडे

### महाविद्यालयस्तरः

प्रथमक्रमाङ्कः — एल. ए. डी. महाविद्यालयः, नागपुरम् गौरी नाईक, आसावरी वानखेडे

### विश्वविद्यालयस्तरः

प्रथमक्रमाङ्कः विश्वजीत श्रोते, धनश्री शर्मा
अस्मिन्नवसरे भारतीयज्ञानपरम्पराकेन्द्रस्य सह-समन्वयकः प्रो. हरेकृष्ण-अगस्ती तथा डॉ. रेणुका-बोकारे विशेषरूपेण उपस्थितौ आस्ताम्। कार्यक्रमस्य सफलायोजने आदित्य-शुक्लः, पवन-कळंबे तथा ब्रिजेश-सोमकुवर इत्येतैः तकनीकीविभागस्य पक्षतः प्रदत्तस्य अमूल्यसहयोगस्य तथा सर्वेषां विद्यार्थिनां प्रदत्तस्य स्फूर्तिपूर्णस्य, आनन्दपूर्णस्य प्रतिसादस्य सहयोगस्य च कृते आयोजकानां पक्षतः हार्दिकं धन्यवादं ज्ञापितम्।



# मणिपुरे महतोत्साहेन संस्कृत-सप्ताहमहोत्सवः परिपालितः

भारतस्य उत्तरपूर्वसीम्नि मणिपुरे बिबिधकार्यक्रमेण संस्कृतसप्ताहमहोत्सवःपरिपालितः।राधामाधवादर्श-संस्कृतमहाविद्याल-यस्य प्रचेष्टया संस्कृत महोत्सवस्य विजयघोषः महता वैभवेन मणिपुरजनैः कर्णीकृतः।प्रथमदिवसे रूद्राभिषेकेण उद्घाटितोऽयं महोत्सवः विशिष्टव्याख्यान-राष्ट्रियचर्च्चासत्र-कविगोष्ठी-युवसंस्कृतसम्मेलन-राज्यस्तरीय-गीतापाठ-योगसूत्रा-वृत्ति-भाषणस्पर्धा-योगासनस्पर्धा-शान्तिशोभायात्रा-निराश्रयवसतिमध्ये द्रव्यदानादिकार्यक्रमैः परिसमाप्तिमभजत।मणिपुरस्य माध्यमिकोच्च-माध्यमिकस्तरे पाठ्यक्रमे संस्कृतम् अनिर्वार्यविषयत्वेन ग्रहणाय प्रस्तावः सर्वकाराय प्रदत्तः।वृत्तिभित्तिकसंस्कृतशिक्षायै आलोचना जाता यत्र मणिपुरशिक्षाविभागाधिकारिणा सह संस्कृतभारती-राष्ट्रियस्वयंसेवकसंघ-अखिलभारतीयविद्यार्थि-परिषद्विश्वविद्यालयानां विशिष्टशिक्षाविदामुपस्थितिर-भवत्।ऐदं प्राथम्येन मणिपुरे संस्कृतस्य कार्यक्रमे सहस्राधिकाः सामान्यजनाः आत्मानं योजितवन्तः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्यबरखेडीमहोदयाः कार्यक्रमस्य सफलायोजनाय जनाभिमुखिकरणाय च प्राचार्यबुद्धेश्वरषडङ्गिनं तथा महाविद्यालय परिवारजनान् अभिनन्दनं प्रायच्छन्।।

# "डी.ए-वी. महाविद्यालयस्य योग-छात्राणां प्रदर्शनम्"





हिमसंस्कृतवार्ताः- उत्तरप्रदेशः
ऋषिकुलयोगपीठेन २०२६ तमस्य वर्षस्य सितम्बरमासस्य ६ दिनाङ्के लखनऊनगरस्य सहकारिताभवने राष्ट्रियसङ्गोष्ठी पुरस्कारसमारोहश्च आयोजितः। यस्मिन् "डी. ए. वी. स्नातकोत्तर-महाविद्यालयः, कानपुरम्" इत्यस्य "डिप्लोमा इन् यौगिक साइन्स" इति पाठ्यक्रमस्य योगशिक्षार्थीभिः स्वस्य मनोहरा सामूहिक-प्रस्तुतिः दत्ता पुरस्काराः प्रमाणपत्राणि च प्राप्तानि। एतैः प्रतिभावद्भिर्योगछात्रैः राजधानीलखनऊनगरे डी. ए. वी. महाविद्यालयस्य नामोज्ज्वलीकृतम्, डी. ए. वी. परिवाराय च गौरवान्वितं भवितुमवसरः प्रदत्तः। योगडिप्लोमापाठ्यक्रमस्य प्रशिक्षिकायाः श्रीमत्याः कञ्चनगुप्तायाः कुशलनिर्देशने योगशिक्षार्थिभिरभ्यासः कृतः, लखनऊनगरं गत्वा चोत्कृष्टं प्रदर्शनमाचरितम्। डी. ए. वी. महाविद्यालयस्य प्रधानाचार्यः प्रो. मनोजजौहरी वर्धापनानि शुभाशयानारशीर्वचनानि चायच्छत्, हार्दिकं धन्यवादञ्च ज्ञापितवान्। संस्कृतविभागस्य विभागाध्यक्षः प्रो. विनोदकुमारपाण्डेयः सर्वेषामुत्साहवर्धनं कृत्वोज्ज्वलभविष्यस्य कामनामकरोत्। योगडिप्लोमा- पाठ्यक्रमस्य संयोजकः डॉ. सवितुरप्रकाशगङ्गवारः कीर्तिमन्तो भूत्वा प्रत्यागतेभ्यः सर्वेभ्यो योगछात्रेभ्यः शुभाशयान् प्रेषितवान् धन्यवादञ्च प्रेषितवान्। अस्मिन् योगप्रदर्शने प्रशिक्षिकायाः कञ्चनगुप्तायाः निर्देशने आञ्चलकुशवाहा, अर्पणा, आशागुप्ता, गीताकुमारी, कौमुदीयादवः, कवितासक्सेना, कुमारीरोज्, कुमारीसावित्री, प्रशस्तित्रिवेदी, सृष्टिसक्सेना, सोनायादवः, उमादेवी च भागं गृहीतवत्यः।


## कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयेन ज्ञानयोगिनः डॉ. श्रीकान्त-जिचकारस्य जयन्त्यवसरे 'भारतीय- ज्ञानपरम्परायाः सामान्यज्ञान- प्रतियोगिता- परीक्षायाः आयोजनम् मङ्गलवासरे

हिमसंस्कृतवार्ताः- डॉ रेणुका, बोकारे नागपुरम्।
भारतीयसंस्कृतेः, भारतीयज्ञानपरम्परां, संस्कृतभाषां च प्रति विद्यार्थिषु जिज्ञासा, गौरवभावना, अध्ययनस्य रुचिः जनयितुं भारतीयदर्शनविभागस्य, भारतीयज्ञानपरम्परा-केन्द्रस्य कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य, रामटेकस्य च संयुक्त-तत्त्वावधानेन संस्कृतसप्ताहस्य अवसरे, ज्ञान-योगिनः डॉ. श्रीकान्तजिचकारस्य जयन्त्युपलक्ष्ये 'भारतीय- ज्ञान- परम्परायाः आधारित-सामान्यज्ञान- प्रतियोगिता- परीक्षा- २०२६' इति परीक्षा मङ्गलवासरे दिनाङ्के ८ सितम्बर २०२६ रामटेकनगरे आयोजयिष्यते। एषा प्रतियोगिता अष्टमी- नवमी- दशमी- कक्षानाम्, एकादशी- द्वादशी-कक्षाणां चेति द्वयोः समूहयोः आयोजयिष्यते। अस्यै परीक्षायै विश्वविद्यालयस्य भारतीयज्ञानपरम्परा- केन्द्रेण भारतीयज्ञान-परम्परायाः आधारितः स्वतन्त्रः मार्गदर्शिकाग्रन्थः सज्जीकृतः अस्ति।अस्यां परीक्षायां भारतीयज्ञानपरम्परा, संस्कृतम्, भारतीयसंस्कृतिः, योगः, आयुर्वेदः, भारतीयदर्शनम्, इतिहासः, विज्ञानं, महान् भारतीयव्यक्तित्वानि, पर्यावरणम्, नैतिकमूल्यानि, सामान्यज्ञानम् इत्यादि-विषयाधारिताः बहुविकल्पीयाः प्रश्नाः समाविष्टाः भविष्यन्ति।राष्ट्रीयशिक्षानीतौ (NEP 2020) भारतीय- ज्ञान- परम्परायै विशेषं महत्त्वं प्रदत्तम् अस्ति। अस्याः पृष्ठभूमेः आधारेण विद्यार्थिषु भारतीय- संस्कृतेः, परम्परायाः ज्ञानसम्पदश्च प्रति गौरवभावनां जनयितुम् आयोजिते अस्मिन् उपक्रमे रामटेकस्य १४ विद्यालयानां प्रायः १५०० विद्यार्थिनः सहभागं करिष्यन्ति।
परीक्षायाम् उत्कृष्टं प्रदर्शनं कुर्वन्तः विद्यार्थी नकदपुरस्कारेण सम्मानिताः भविष्यन्ति। तदतिरिक्तं अधिकाधिकविद्यार्थिनां सहभागिता सुनिश्चित्य भारतीयज्ञानपरम्परायाः प्रसाराय विद्यालयान् प्रोत्साहितुं 'उत्कृष्ट-परीक्षा-केन्द्रम्' इति विशेषपुरस्कारः अपि प्रदास्यते। इयं सूचना भारतीयज्ञानपरम्परा-केन्द्रस्य समन्वयिका प्रो. कलापिनी अगस्ती इत्यनया प्रदत्ता।
केन्द्रस्य सह-समन्वयकौ प्रो. हरेकृष्ण अगस्ती, डॉ. रेणुका बोकारे च अस्मिन् उपक्रमे सहभागिनः सर्वान् विद्यालयान् शुभकामनाः प्रदत्तवन्तौ।



# रोचकतथ्यानि

**सूर्यस्य प्रकाशः**—सूर्यस्य प्रकाशः पृथिवीं प्राप्तुं प्रायः अष्टौ निमेषाः विंशतिः क्षणाः (8 निमेषाः 20 क्षणाः) च गृह्णाति।
**अष्टपादस्य हृदयम्**—अष्टपादस्य (Octopus) शरीरे त्रीणि हृदयानि नव मस्तिष्कानि च भवन्ति, तस्य रक्तं नीलवर्णं भवति।
**मधु**—मधु (Honey) एकमात्रं तादृशं भोजनम् अस्ति यत् सहस्रवर्षेषु अपि न नश्यति।
**शुक्रग्रहस्य गतिः**—शुक्रग्रहे एकं दिनं तत्रत्यस्य एकस्य संवत्सरस्य (वर्षस्य) अपेक्षया दीर्घतरं भवति।
**जलस्य विस्तारः**—यदा जलं घनीभूय हिमशैलत्वं प्राप्नोति, तदा तस्य आयतनं प्रायः नवप्रतिशतं (९%) वर्धते।
**मानवनेत्रम्**—मानवनेत्रं प्रायः एककोटि-परिमितानां (10 million) विभिन्नवर्णानां भेदं ज्ञातुं समर्थं भवति।
**अन्तरिक्षे निःशब्दता**—अन्तरिक्षे माध्यमस्य (वायोः) अभावात् शब्दतरङ्गाः न प्रसजन्ति, अतः तत्र सर्वदा पूर्णशान्तिः भवति।
**कदलीफलस्य विकिरणम्**—कदलीफले पोटैशियम-तत्त्वस्य प्रचुरत्वात् तस्मिन् अल्पमात्रायां प्राकृतिकं रेडियोधर्मी-विकिरणं भवति।
**काचकूपी**—काचस्य एकस्याः कूप्याः प्रकृतौ पूर्णविघटने प्रायः दश लक्षं (10,00,000) वर्षाणि अपेक्षन्ते।
**तडित्-तापः**—आकाशे उत्पद्यमानायाः विद्युतः (तडितः) तापमानं सूर्यस्य उपरितनतलात् पञ्चगुणं अधिकं भवितुं शक्नोति।
**मानवशरीरस्य अस्थीनि**—शिशुजन्मसमये शरीरे प्रायः त्रीणि शतानि (३००) अस्थीनि भवन्ति, किन्तु प्रौढावस्थायां तानि संयुज्य षड्उत्तरद्विशतं (206) अवशिष्यन्ते।
**पिपीलिकानां जागरणम्**—पिपीलिकाः कदापि न स्वपन्ति, तासां शरीरे फुफ्फुसे (Lungs) अपि न भवति।
**लौहस्य भारवृद्धिः**—यदा अयसि (लौहे) किट्टः (Rust) लगति, तदा आक्सीजन-संयोगेन तस्य भारः किञ्चित् वर्धते।
**प्लवमानः शनिग्रहः**—शनिग्रहस्य सान्द्रता जलादपि न्यूना अस्ति; यदि विशालजलाशयः स्यात्, तर्हि शनिग्रहः जले प्लवेत् (तरेत्)।
**डीएनए-दीर्घता**—यदि मानवशरीरस्य समग्राणि डीएनए-सूत्राणि (DNA) प्रसार्यन्ते, तर्हि तत् पृथिव्याः प्लूटोग्रहपर्यन्तं गत्वा पुनरागन्तुं शक्नोति।




## "संस्कृत कथा मञ्जिरी" {१५}
## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
# "अथ राक्षसबद्धो नाम नवमोपाख्यानम्" (१)

अथ भोजः समुत्काण्ठतचेताः सिंहासनं प्रतिगच्छन् सङ्ग्रहस्तयोः निवार्य्यमाणः पुत्तलिकाऽपरया निजगदे- भो राजन्! एतत्सिंहासने तेनैव अध्यासितव्यं यस्य विक्रमतुल्यं शौर्यौदार्य्यादिकमस्ति। भोजनोक्तं- भो पुत्तलिके! कथय तस्य शौर्य्यौदार्य्यवृत्तान्तम्। सा वदति- नरलोकाधिनाथ! विक्रमे राज्यं कुर्वति भट्टिर्मन्त्री बभूव, उपमन्त्री गोविन्दः, चन्द्रशेखरः सेनापतिः, त्रिविक्रमः पुरोहितः। तत्र त्रिविक्रमस्य पुत्रः कमलाकरः स पितुः प्रसादात् घृतौदनं भुक्त्वा वस्त्र- भूषण- ताम्बूलादिना सम्पुष्टशरीरी विषयसुखमनुभवन् तिष्ठति स्म।

एकदा पित्रोक्तं- रे पुत्र! ब्राह्मणजन्म प्राप्य त्वया कथमेवं स्वेच्छावृत्त्या स्थीयते? अयमात्मा जन्मशतं नानायोनिं प्राप्नोति। ब्राह्मणकुले जन्म महता पुण्येन लभ्यते,तल्लब्धाऽपि किमेवं त्वं दुष्टाचारो जातः? सर्वदा बहिरेव वससि, भोजनकाले गृहमायासि, अनुचितमेतत् त्वया क्रियते। तवायं विद्याभ्यासकालः अस्मिन् काले विद्याभ्यासं न करोषि चेत् उत्तरत्र महान् मनःसन्तापो भविष्यति। रे पुत्र! यावदहं जीवामि तावत् त्वया विद्यैवाभ्यसनीया। अपि च अभ्यस्ता विद्या तव सकलमपि बन्धुकृत्यं करिष्यति। एवं तत् पितृवचनं श्रुत्वा पश्चात्तापयुक्तः कमलाकरः 'यदाऽहं सर्व्वज्ञो भविष्यामि, तदैव पितरं स्वमुखं दर्शयामि' इत्युक्त्वा काश्मीरदेशं जगाम। तत्र चन्द्रमौलि-भट्टोपाध्यायसमीपं गत्वा दण्डवत् प्रणम्योक्तवान्- भो स्वामिपादाः! अहं मूर्खः, भवतां नामधेयं गुणगौरवञ्च श्रुत्वा विद्याऽभ्यासार्थमागतः। मयि कृपां विधाय यथा मे विद्या भवेत् तथा विधेयं श्रीमद्भिः इति पुनर्दण्डवत् प्रणाममकरोत्। ततस्तैरङ्गीकृते अहर्निशं तेषां शुश्रूषामकरोत्। एवं शुश्रूषां कुर्वतो महान् कालो गतः। एकदा उपाध्यायः तस्योपरि कृपां विधाय सिंहसारस्वतमन्त्रोपदेशं कृतवान्। तेनोपदेशेन सर्व्वज्ञो भूत्वा स कमलाकर उपाध्यास्यानुज्ञां गृहीत्वा स्वनगरं प्रतिगच्छन् मार्गवशात् काञ्चीनगरम् अवाप। तत्र राजा नरसेनः। तस्य नगर्य्यां नरमोहिनीनाम्नी काचित् वारवनिता अस्ति सा रूपेण अद्वितीया तां यः कोऽपि पश्यति स कामज्वरपीडितः उन्मादावस्थां प्राप्नोति यः पुनः सम्भोगान्ते तया सह निद्राति तस्य रक्तं विन्ध्याचलवासी कश्चिद्राक्षसः तत्र आगत्य पिबति, तदा स निर्जीवो भवति इति किंवदन्ती श्रुत्वा तत्र तिष्ठन् कमलाकरोऽप्येतत् कौतुकं स्वचक्षुषा प्रत्यक्षीकृत्य निजनगमगमत्। सुचिरकालात् परं तं विद्याविनयादिगुणभूषितं गृहे प्रत्यागतं दृष्ट्वा मातापित्रोः महान् हर्षो जातः। तथा च-

"विद्याविहीना बहवोऽपि पुत्राः, कल्पऽऽयुषः सन्तु पितुः किमैतैः? क्षयिष्णुना वाऽपि कलावता वा, तस्य प्रमोदः शशिनेव सिन्धोः।।"

द्वितीयदिवसे स्वपित्रा सह राजभवनं गत्वा राज्ञे आशीर्वादम् अकोरत्, सभायां निजवैदग्धमञ्च अदर्शयत्। ततो विक्रमार्केण असौ वस्त्रादिना सम्भाव्य पृष्टः- भो कमलाकर! त्वं यत्र देशे गतः तत्र किं चित्रं दृष्टम्? तेनोक्तं- भो राजन्! तत्र देशे किमपि न दृष्टं परं प्रत्यागमनसमये काञ्चीनगरे अपूर्वमेकं कौतुकं दृष्टम्। राज्ञोक्तं- किं दृष्टं तत् कथय। कमलाकरेणोक्तं- नरसेनभूपतिशासिते काञ्चीनगरे नरमोहिनि नाम्नो सुरूपा काचिद्वारवनिता अस्ति, यस्तां पश्यति स उन्माददशां प्राप्नोति, यः पुनः रञ्जन्यां तया सह स्वपिति, तस्य रक्तं विन्ध्याचलवासी कश्चिद्राक्षसः तत्रागत्य पिबति, ततः स निर्जीवो भवति। एतत् कौतुकं मया दृष्टम् तत् श्रुत्वा राज्ञा भणितं- यद्येवं त्वं तर्हि आगच्छ, तत्र गच्छाव।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्यतनी वार्ता अतीव हास्यास्पदा। भारते एकस्य नरस्य पारपत्रं नष्टम्। नूतनपारपत्रं न प्राप्तं तेन। अतः सः कारागारं गतः। तेन आरक्षकाः उक्ताः- 'अहं बद्ध्वा गृहं प्रेष्ये' इति। आरक्षकाः चकिताः जाताः।

**नन्दिनी-** अहो, मूर्खः सः नरः! इयं द्वितीया वार्ता श्रूयताम्। एक्वाडोरदेशे एकः मद्यपः आरक्षकैः दृष्टः। आरक्षकैः सः उक्तः- 'तव न्यायवादिनम् आह्वय' इति। तेन धनपत्रं कर्णे स्थापितम्! तेन धनपत्रेण सह सम्भाषणम् आरब्धम्।

**काव्या-** हा! हा! तस्य दूरभाषयन्त्रम् अतीव विचित्रम्! अन्यां वार्तां शृणु। ओरेगन-प्रान्ते आरक्षकैः एकं यानं दृष्टम्। ततः चालक-यात्रिकाभ्यां स्वस्थानं परिवर्तितम्। परन्तु द्वितीयः अपि मद्यपः एव अभूत्! आरक्षकैः तौ द्वौ अपि बद्धौ।

**नन्दिनी-** अहो, मद्यपानां बुद्धिः विनष्टा! अन्तिमा वार्ता बेल्जियम-देशात्। तत्र आरक्षकैः एकं यानं रुद्धम्। तस्य यानस्य चालकः एकः द्वादशवर्षीयः बालः आसीत्! तस्य पिता मद्यपः अभूत्। पित्रा उक्तम्- 'अहं मद्यपः अस्मि, अतः बालेन यानं चालितम्। एतत् एव सम्यक्' इति।

**काव्या-** आश्चर्यम्! जगति बहवः मूर्खाः दृष्टाः। अद्यतने वार्ता-कार्यक्रमे एतावत् एव।






# खरियां गल्लां

तू मने दा कूड़ा बुहारा कर।
एह कम्म खरा ते प्यारा कर ।।
ढेई पिया तां दस्स के होया।
उट्ठणे दी हिम्मत दुबारा कर।।
चादरी बाह नी जंघां कढणी।
ढकणे अंदर गुजारा कर।।
हार जीत तां चलदी रैह्नी।
दिले छा कदी नी हारा कर।।

अपणा दिलड़ु बड्डा रक्खणा।
ईंयां नी म्हारा - तुम्हारा कर।।
ढैंहदा -डुबदा कोई मिल्लै।
समझी धर्म सहारा कर।।
औक्खिया घाटिया कम्मे आंदे।
सज्जण मित्र संवारा कर।।
जे मिल्या सै गोदा पाई लै।
रब्ब देयां रंगां नजारा कर।।

**अशोक दर्द**
**डलहौजी चंबा हिमाचल प्रदेश**

